कर्णव्यध अध्याय में दक्षिणात्य चिकित्सकों के अनुसार कर्ण के ऊपर कोटिव्यध करने का निर्देश डल्हण ने किया है (सू० १६/२४ पर)। पुन्नाग का नाम दक्षिण में सुरपति (सू० ३८/१२, २२) पढ़ा गया है। इसके अन्तर्गत सुश्रुत ने मूल में पाण्ड्य का ही उल्लेख किया है एवं जलौका की प्राप्ति के स्थानों में पाण्ड्य प्रदेश के साथ पोतन का भी उल्लेख किया है। यह पोतन भूगोलविदों के अनुसार अश्मक की राजधानी साम्प्रतीन महाराष्ट्रान्तर्गत पैठान नामक स्थान है पर डल्हण पोतन से मथुरा प्रदेश (सू० १३/२२ पर) ग्रहण करते हैं। इसी दक्षिणापथ में ही विन्ध्य, सह्य, मलय (श्रीशैल और महेन्द्र) जैसे पर्वत एवं दक्षिणाभिमुख नदियों का समावेश होता है, जिनका सुश्रुत ने स्वतः उल्लेख किया है। डल्हण ने पाण्ड्य का परिचय दक्षिण दिशा में स्थित

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

देश के रूप में किया है और शक्ति-संगम-तन्त्र सप्तम पटल का एक श्लोक उद्धृत किया है—

"काम्बोजाद् दक्षभागे तु इन्द्रप्रस्थाच्च पश्चिमे ।
पाण्ड्यदेशो महेशानि ! महाशूरत्वकारकः ॥"

(सू० १३/१२ पर)

सम्प्रति तमिलनाडु प्रान्त के तिरुनेलवेल्ली और मदुराई जिले इसके परिचायक हैं ।

मध्यदेश

मध्यदेश से उस भूखण्ड का बोध होता है जो कि कुरुक्षेत्र में सरस्वती नदी से पश्चिम की ओर से इलाहाबाद में संगम से उत्तर की ओर हिमालय और विन्ध्य के बीच में स्थित है । अथर्ववेद में मध्यदेश का निर्देश है । इस मध्यदेश में गरुड पुराण के अनुसार पाञ्चाल, कुरु, मल्ल, अवधेय, पटच्चर, कुन्ती और सूरसेन इसमें सम्मिलित थे (ग० पु०, ५५/१०) ।

आजकल इसकी सीमा पाञ्चाल से पूरब चम्बल के आसपास से लेकर सोन नदी के किनारे से होती हुई इलाहाबाद को स्पर्श करती हुई पुनः बरेली तक मानी जा सकती है । डल्लण के निबन्ध-संग्रह में निम्न स्थलों पर मध्यदेश का निर्देश हुआ है—सू० ४५/१४, १६२; ४६/५; चि० ७/३; २३/१० । डल्लण ने अन्तर्वेदी का नाम लिया है जो कि मध्यदेश में ही आता है । गंगा और यमुना नदी के मध्य भाग के दोआब को अन्तर्वेदी शब्द से अभिहित किया गया है । मनुस्मृति ने इस सीमा की पुष्टि की है । डल्लण ने शालि के भेद कलम का परिचय अन्तर्वेदी क्षेत्र में कलवि के नाम से दिया है (सू० ४५/५ पर) ।

जेजीभुक्ति—सुश्रुत द्वारा सुरसादिगण में पठित सुमुख नामक वनौषधि का परिचय देते हुए डल्लण ने उसे राजिका बताया है । पर एकीयमत के माध्यम से उन्होंने जेजीभुक्त प्रदेश में इसका नाम सउहा या वनपश्का बताया है (सू० ३८/६ पर) । प्राच्य भूगोलविद् जेजीभुक्ति से आधुनिक बुन्देलखण्ड का ग्रहण करते हैं ।

डल्लण द्वारा निर्दिष्ट नदियाँ

१. गंगा—नदी और नद के पार्थक्य में गंगा का उल्लेख डल्लण ने किया है । यह हिमालय के गंगोत्री से निकल कर काशी होती हुई बंगाल की खाड़ी में गिर जाती है । डल्लण निर्दिष्ट सोन और सरयू नदियाँ इसमें मिलती हैं ।

Bharatiya Vidya Bhavan, New Delhi Collection



डल्हण द्वारा निर्दिष्ट नदियां एवं समुद्र

२. चर्मण्वती—इसका वर्तमान नाम चम्बल नदी है जो कि राजस्थान के अरावली के अति उन्नत शिखर से निकलती है। इसके उद्‌गम का पर्वतीय स्थान जनपावा है। यह नदी बाद में इटावा के आस-पास यमुना में मिल जाती है। महाभारत के अनुसार रन्तिदेव के यज्ञ में गौओं के वध से उत्पन्न रक्त के अंश से इसकी उत्पत्ति हुई थी। डल्हण ने गिलोड्य नामक कन्द का परिचय देते हुए इसे चम्बल नदी के तट पर होने वाला तत्कालीन गुलाहडक नामक कन्द बताया है (सू० ३८/५, १३; चि० ११/८)।

३. तापी नदी—यह वर्तमान ताप्ती नदी है जो कि विन्ध्य पर्वत के सतपुड़ा श्रृंखला के गोनन गिरि नामक स्थल से निकल कर सूरत होती हुई अरब सागर में गिरती है। डल्हण ने इसे माक्षिक का उत्पत्ति स्थान माना है और 'तापीज' से माक्षिक का ग्रहण किया है।

४. नर्मदा—यह अमरकण्टक से निकल कर कम्बात की खाड़ी में गिरती है। ताप्ती की तरह ही यह भी एक पश्चिमवाहिनी नदी है। डल्हण ने अपनी

In Public Domain. Digitization by eGangotri and Sarayu Trust

निबन्ध-संग्रह-व्याख्या में इसका निम्न दो स्थलों में निर्देश किया है—सू० १३/१२ एवं ३८/५, १३।

५ शोण नदी—शोण बहुत बड़ा नद है जो कि गोण्डवाना खण्ड के विन्ध्याचल पर्वत-शृंखला के ऊपर अमरकण्टक नामक पर्वत-शृंखला से उद्भूत है। बिहार में बांकीपुर में गंगा में मिल जाता है। इसका प्राचीन नाम शोण है।

६. सरयू—यह आजकल की घाघरा या सरयू नदी है जो कि कुमायूँ की पहाड़ियों से निकल कर अयोध्या होती हुई बलिया से कुछ दूर जाकर गंगा में मिल जाती है। बाजीकरण में पठित उच्चटा नामक ओषधि का परिचय देते हुए डल्हण ने इसकी उत्पत्ति हिमालय पर जहाँ से सरयू निकलती है, वारिन्द्र नामक स्थान पर बताई है।

७. सिन्धु—यह वर्तमान सिन्धु नदी है जो कि मानसरोवर से निकल कर कश्मीर और पाकिस्तान होते हुए अरब सागर में जा गिरती है। डल्हण ने सू० ४५/३ में शोण के साथ इसका भी नाम लिया है।

८. वर्णसा—यह राजस्थान की वर्तमान बनास नदी है जो कि अरावली या आबू के पास से निकल कर चम्बल में मिल जाती है। स्रोतों अञ्जन की उत्पत्ति का स्थान डल्हण ने वनास और सिन्धु नदी का तट माना है (उ० ६०/२६)।

डल्हण द्वारा निर्दिष्ट समुद्र

१. दक्षिण समुद्र—डल्हण ने अपनी निबन्ध-संग्रह-व्याख्या में दक्षिण समुद्र का उल्लेख किया है। यह वर्तमान हिन्द महासागर है।

२. पश्चिम समुद्र—डल्हण ने पश्चिमार्णव, पश्चिमोदधि एवं पश्चिम समुद्र का विविध स्थलों पर निबन्ध-संग्रह-व्याख्या में उल्लेख किया है (पृ० ३५५, ४००, ४३१, ७५२, ७७६, ८६१)। पश्चिम समुद्र से आधुनिक अरब सागर का ग्रहण करना चाहिए।

३. पूर्व समुद्र—पूर्व समुद्र से तात्पर्य बंगाल की खाड़ी से है। डल्हण ने पश्चिम समुद्र के साथ (सू० ४५/१४) इसका भी उल्लेख किया है।

४. क्षीर समुद्र—यह वर्तमान कैस्पियन सागर है जो ईरान से उत्तर, तुर्कमीन से पश्चिम, टर्की से पूरब तथा रूस से दक्षिण दिशा में स्थित है। डल्हण ने चि० २६/६ में इसका नाम निर्देश किया है।

डल्हण द्वारा निर्दिष्ट पर्वत

१. केदार गिरि—यह हिमालय पर्वत का एक खण्ड है जो केदारनाथ

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नामक स्थान के नाम से प्रसिद्ध है। डह्लण ने सू० ४६/४८८ की व्याख्या में इसका उल्लेख किया है।



डह्लण द्वारा निर्दिष्ट
पर्वत एवं समुद्र

२. **पारियात्र**—विन्ध्य पर्वत शृंखला का पश्चिमी भाग जो चम्बल नदी के उद्‌गम से लेकर खम्बात की खाड़ी तक फैला हुआ है पारियात्र है। भण्डारकर के अनुसार यह विन्ध्य का वह भाग है जहाँ से चम्बल और वेतवा नदियाँ निकलती हैं। इसके अन्तर्गत राजस्थान की छोटी-मोटी पहाड़ियाँ और अरावली पर्वत सन्निविष्ट है।

३. **बिदूर पर्वत**—बिदूर या वैदूर्य विन्ध्य पर्वत की शृंखला है जो कि महाराष्ट्र और मध्य प्रदेश के मध्य में फैली हुई है। नर्मदा के समानान्तर भानर पर्वत शृंखला इस वैदूर्य पर्वत का स्मरण कराती है। जहाँ का वैदूर्य प्रसिद्ध है।

४. **मलय पर्वत**—दक्षिणी घाट एवं कावेरी नदी के दक्षिणी भाग का एला-

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मले पर्वतमाला वाला अंश इसके अन्तर्गत आता है। इसकी शृंखला कोयम्बटूर से कन्याकुमारी तक फैली हुई है। यह मलय गिरि कहलाता है। इसका वर्तमान नाम अन्नमलई हिल है। डल्हण ने सूत्र ४५/१४ में इसका उल्लेख किया है।

५. सह्याद्रि पर्वत—यह पश्चिम घाट का उत्तरी भाग है जो कि कावेरी से कोयम्बटूर तक फैला हुआ है। दूसरे शब्दों में इसकी शृंखला कन्याकुमारी से ताप्ती नदी की घाटी तक है। गोदावरी, भीमा, कृष्णा, तुंगभद्रा और कावेरी नदियाँ इससे निकलती हैं।

६. हिमालय पर्वत—डल्हण ने हिमवत् या हिमालय पर्वत की अनेक स्थलों (सू० ४५/३१९, ४६/५३, क० २/४) पर अपनी निबन्ध-संग्रह-टीका में चर्चा की है। यह विश्व का सर्वोच्च पर्वत है जिसकी अनेक शृंखलाएँ हैं जो कि पश्चिम में सिन्धु नदी से पूर्व में ब्रह्मपुत्र नदी तक फैला हुआ है। पूरब से पश्चिम इस पर्वत की लम्बाई २२१४ किलोमीटर है। इसकी चौड़ाई उत्तर से दक्षिण १६० से २४१ किलोमीटर है। हिमालय को चोटियाँ सदैव हिमाच्छादित रहती हैं। भौगोलिक दृष्टि से इसके तीन मुख्य विभाग हैं— (१) वृहत्तर या आभ्यन्तर भाग, (२) मध्य हिमालय और (३) लघु या बाह्य भाग। प्रथम वर्ग के अन्तर्गत नन्दा देवी, त्रिशूल, केदारनाथ, बद्रीनाथ, गंगोत्री आदि की चोटियाँ आती हैं, जिनकी ऊँचाई २० हजार फीट से कहीं अधिक है। मध्य हिमालय के चोटियों की ऊँचाई १५ हजार से १२ हजार फीट तक है और इनकी पर्वतमालाएँ देहरादून के निकट शिवालिक पर्वत के समानान्तर फैली हैं। हिमालय की लघु पर्वतमालाओं की चोटियाँ बहुत हो कम ऊँची हैं। मध्य हिमालय की पर्वतमाला में हिन्दूकुश, कर्राकोरम और कैलाश की मालाएँ आती हैं। हिन्दूकुश पर्वतमाला भारत को अफगानिस्तान से पृथक् करती है। यही हिन्दूकुश सुश्रुत का मुजवान् पर्वत है जहाँ पर सोम प्रचुर मात्रा में कभी पाया जाता था।

७. विन्ध्य पर्वत—यह पर्वत भारत के मध्य भाग में पश्चिम से पूरब की ओर फैला हुआ है, जिससे नर्मदा, सोन और ताप्ती जैसी नदियाँ निकलती हैं।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

द्वितीय खण्ड

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

षष्ठ अध्याय

स्रोतोभूत सामग्री का संग्रह

इस प्रकरण में शोध-ग्रन्थ के स्रोतोभूत डल्हण व्याख्यान को मूलपाठ के रूप में इसलिए प्रस्तुत किया गया है जिससे एक स्थल पर ही डल्हण की द्रव्य-गुणशास्त्राभिज्ञता का दर्शन किया जा सके। मूलपाठ की प्रस्तुति से प्रतिज्ञात अध्यायों में प्रस्तुत की गई समीक्षा की प्रामाणिकता को सम्बल मिलता है।

हमने स्थानों के अध्यायानुसार गद्य-पद्य के सन्दर्भों के माध्यम से ही डल्हण के सम्बद्ध व्याख्यान को उसी रूप में संकलित किया है जिस रूप में डल्हण ने अपनी टीका में प्रस्तुत किया है। शोध-ग्रन्थ की प्रतिज्ञात मर्यादा के भीतर ही अभीष्ट व्याख्यापरक सामग्री का निदर्शन कराया गया है। इससे डल्हण की बहुश्रुतता एवं पर्यवदातशास्त्रता का परिचय बड़ी सरलता से मिल जाता हैं। सम्बद्ध क्षेत्र में उदात्त शोध के लिए यह प्रयास अत्युपादेय सिद्ध होगा।

सूत्रस्थानम्

अध्यायः १

तासामिति द्विविधानामोषधीनां मध्ये। के ते चत्वारः प्रकारा इत्याह—वनस्पतय इत्यादि। तानेव विवरितुमाह—तास्विति; तासु मध्ये। अपुष्पा इति अविद्यमानपुष्पाः, फलवन्त इति फलं येषामस्ति ते वनस्पतय इति; के पुनरीदृशाः? प्लक्षोदुम्बरादयः। पुष्पफलवन्तो वृक्षा इति उभययुक्ता वृक्षाः; के ते? आम्रजम्बू-प्रभृतयः। प्रतानवत्य इत्यादि प्रतानवत्यो विस्तारवत्यः वीरुधः, न केवलं प्रतान-वत्यो वीरुधः स्तम्बिन्यश्च गुल्मिन्यश्च, गुल्मः पुनः वर्तुललतासन्ततिविटपः, ताश्च विदारीकोलवल्लीशालपर्णीपृश्निपर्णीप्रभृतयः। केचित् 'स्तम्बिन्यश्च' इत्यत्र 'गुल्मिन्यश्च' इति पठन्ति, तत्रापि स एवार्थः। फलपाकनिष्ठा इति निष्ठा नाशः, फलपाकेन परिणतया नाशो यासां तास्तथोक्ताः; ते पुनर्गोधूमादयः। अन्ये तु निष्ठाशब्दं प्रत्येकं सम्बध्नन्ति, फलनिष्ठाः पाकनिष्ठा इति; तत्र फल-निष्ठाः शालितिलकुलत्थादयः, पाकनिष्ठाः कवकादयः; कवकश्छत्रक उच्यते ॥ २९ ॥

जङ्गमाः खल्वपीत्यादि।—खलुशब्दः शिष्यसंबोधने, हे सुश्रुत, जङ्गमा अपि चतुर्विधाः चतुष्प्रकाराः। तानाह—जरायुजेत्यादि। एतच्च पूर्वं व्याख्या-

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तम्। जरायुजादिषु पूर्वोक्तसंस्वेदजादिक्रमत्यागो योनिसंकरं बोधयति; तेन पक्षिषु बलाका जरायुजा अण्डजा चेति, सर्पजातिषु अहिपताका जरायुजा, संस्वेदजेष्वपि काश्चित् पिपीलिका अण्डजा उद्भिज्जाश्च। व्यालादय इति व्याला हिंस्रपशुव्याघ्रादयः, अन्ये तु पशुग्रहणादेव हिंस्रपशूनामपि ग्रहणमिति व्यालशब्देन सर्पविशेषमाहुः। तदुक्तं 'सर्पजातिषु अहिपताका जरायुजा—' इति। आदिग्रहणाद् बलाकाजतुकादयः। इहोपकरणप्रस्तावे पशूनां प्राधान्यमिति प्राङ्निर्देशः; प्राग्भूतग्रामप्रसंङ्गेन पुरुषप्राधान्यख्यापनार्थम्, अत्र पुनर्जरायुजाण्डजेत्यादिपाठ ओषधित्वख्यापनायेति न पौनरुक्त्यम्। खगसर्पेत्यादि खगाः पक्षिणः; सर्पा मन्दगामिनोऽजगरप्रभृतयः, सरीसृपाः शीघ्रगामिनः कृष्णासर्पादयः, मीनमकरादयो वा; प्रभृतिग्रहणात् कूर्मनक्रादीनां ग्रहणं; केचित् प्रभृतिशब्दमपठित्वा लुप्तनिर्दिष्टेनादिशब्देन कूर्मादीन् गृह्णन्ति। कृमिकीटेत्यादि कृमयः कोष्ठपुरीषादिवाष्पसम्भवाः; कीटा वृश्चिकषड्बिन्दुप्रभृतयः, पिपीलिकाश्चिटिकाः, प्रभृतिग्रहणादेवंविधा अन्येऽपि दृश्यन्ते। इन्द्रगोप इत्यादि इन्द्रगोपाः प्रावृट्कालजा अतिरक्तकृमयः 'इन्द्रवधू' इति लोके। प्रभृतिग्रहणादीदृशा अन्येऽपि ॥ ३० ॥

स्थावरजङ्गमयोर्निर्दिष्टयोश्चिकित्सोपयोगिनोऽवयवविशेषान् दर्शयितुमाह—तत्र स्थावरेभ्य इत्यादि। स्वरसादय इत्यादिग्रहणात्तैलक्षार-भस्मकण्टकप्रभृतीनां ग्रहणम्। केचित् कन्दं सूत्रे न पठन्ति, आदिशब्दाच्च गृह्णन्ति। रोमरुधिरादय इत्यादिशब्दान्मांसवसाघृतास्थिखुरादयः ॥ ३१ ॥

रसाधिकारिकमौषधिवर्गं स्थावरजङ्गमं प्रतिपाद्य, परिशिष्टं प्रतिपादयितुमाह—पार्थिवा इत्यादि। पृथिव्या विकाराः पार्थिवाः, रजतं रौप्यं, मणिः स्फटिकादिः, मुक्ता मौक्तिकं, मृत् मृत्तिका, कपालं कर्परम्। सुवर्णस्येह पार्थिवत्वमेवाङ्गीक्रियते गुरुत्वकाठिन्यस्थैर्यादिहेतुभिः। सूत्रे आदिग्रहणाल्लोहमलसिकतासुधाहरितालवणगैरिकरसाञ्जनप्रभृतीनां ग्रहणम्। यद्यपि स्थितिशीलत्वात्तथा लोकद्वित्वसमाख्यानेऽपृथगुक्तत्वाच्च स्थावरशब्देनैव पार्थिवा उच्यन्ते, तथाऽप्यत्र प्रकरणाद्येष्वाहारोपयोगित्वं फलमूलाद्यवयवेषु रसप्रधानतया तत्रैव चतुर्विधे वनस्पत्यादिगणे स्थावरशब्दो वर्तते न तु पार्थिवेष्वपि, तेषामाहारेषु प्रायेणानुपयोगात्; अन्यदपि समाधानान्तरमस्ति, तच्च विस्तरभयान्न लिखितम् ॥ ३२ ॥

अध्यायः ६

…शक्रगोप इन्द्रवधूः, अन्ये ज्योतिरिङ्गणमाहुः। नीपो धूलीकदम्बः ॥
॥ ३१-३२ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""बाण: सहचर:, सप्ताह्व:; सप्तपर्ण:, बन्धूक: बन्धुजीवक:, 'वादुली' इति लोके"" ॥ ३६ ॥

अध्यायः ११

""असितमुष्ककं कृष्णपुष्पमोक्षकं, न श्वेतादिपुष्पम्। ""सुधाशर्करा: सुधा-पाषाणा:। भस्मशर्कराश्चेति दह्यमानार्द्रकाष्ठरसाच्छर्करेवान्योन्यसंहतं भस्मजातं भस्मशर्करेत्युच्यते, तां च पृथग् गृह्णीयात्; पृथग्ग्रहणं भिन्नप्रयोजनार्थं:; तेन भस्मन: क्षारोदककरणं, भस्मशर्करा पुन: क्षारद्रव्यसमावापिनी। ""पलाश: किंशुक:; अश्वकर्ण: पूर्वदेशे गन्धमुण्ड: पिप्पलसदृश:; पारिभद्रको देवदारु:, अन्ये तु रक्तकुसुम: कण्टकीवृक्षविशेष: स्वनाम्ना प्रसिद्ध:; तिल्वक: स्वनामप्रसिद्ध:; इन्द्रवृक्ष: कुटज एव, द्विविधो हि कुटजो बृहत्फल: श्वेतपुष्प: स्निग्धपत्र: पुमान्, अणुफलवृन्ता श्यावारुणापुष्पा स्त्री; आस्फोता सारिवा; कोशातकी घोषक:; सा चतुर्विधा-बृहत्फला, अल्पफला, पीतपुष्पा, श्वेतपुष्पा, इति"" ॥ ११-१२ ॥

अध्याय: १२

""तुगाक्षीरी वंशरोचना, अन्ये तु वंशरोचनानुकारि पार्थिवं द्रव्यं, प्लक्ष: पर्कटी, चन्दनं रक्तचन्दनं, सामृतैरिति गुडूचीसहितै:"" ॥ २३-२४ ॥

अध्याय: १३

""पद्मोत्पलेत्यादि पद्ममीषच्छुक्लम्, उत्पलमीषन्नीलं, नलिनमीषद्रक्तं; कुमुदं 'कुइआ' इति लोके, सौगन्धिकं गर्दभपुष्पाभिधानमत्यन्तसुरभि चन्द्रोदय-विकाशि, कुवलयं रक्तोत्पलं, पुण्डरीकं अतिश्वेतपद्मं, शैवलं, शैवालं, कोथ-जाता इति एषां पूतिभावजाता:"" ॥ १४-१५ ॥

""वल्लूरं शुष्कमांसम्"" ॥ १७ ॥

अध्याय: १४

""पत्तङ्गं रक्तचन्दनं, सर्जरसो राला, शुक्तिर्जलशुक्ति:। साल: शङ्कु:, सर्ज: शालभेद:, अर्जुन: ककुभ:, अरिमेद: 'अरिमञ्ज' इति लोके प्रसिद्ध:; मेषश्रृङ्ग: कर्कटश्रृङ्ग:, धन्वन: 'धम्मण' इति प्रसिद्ध:।"" एण: कृष्णहरिण:, हरिणस्ताम्रवर्ण:"" ॥ ३६-३८ ॥

अध्याय: १५

""मेद्यान्नोपयोग इति स्निग्धान्नोपयोग:; 'मेध्याण्डोपयोग' इत्यन्ये पठन्ति, 'मेध्याण्डानि वृष्याण्डानि, बस्तमत्स्याण्डादीनि' इति च व्याख्यानयन्ति ॥ १२ ॥

""उद्दालकादीनामिति उद्दालक आरण्यकोद्रव:; आदिशब्दाद्गवेधुकादीनां

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ग्रहणम् । विरूक्षणच्छेदनीयानामिति विरूक्षणं मेदोघ्नं, छेदनीयं स्रोतोविशोधनीयम् । विधिवदुपयोग इति पुरुषाग्निबलमात्राविधानवानुपयोग इत्यर्थः । लेखनबस्त्युपयोगश्च लेखनबस्तयश्चिकित्सितोक्ताः, "त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमन्विताः । ऊषकादिप्रतीवापा बस्तयो लेखनाः स्मृताः" (चि० अ० ३८)"" ॥ ३२ ॥

""पयस्या अर्कपुष्पी, क्षीरकाकोलीत्यन्ये । विदारिगन्धा शालिपर्णी । मधुराणामित्यादि ऋद्धिवृद्धिजीवकादीनाम् । बृंहणबस्त्युपयोगश्चेति बृंहणबस्तिर्यथा"" ॥ ३३ ॥

अध्यायः १६

""गौरसर्षपजस्थाने 'राजसर्षपजं' इति केचित् पठन्ति, राजसर्षपाः श्वेतसर्षपाः । ""अलर्को मन्दारः, अनन्ता उत्पलसारिवा, विदारिगन्धा शालपर्णी, क्षीरशुक्ला क्षीरविदारी; जलशूको जलनीलिका, जलान्तर्वर्ती रोमयुक्तः सविषप्राणी वा; जलशूको जलसंस्थस्तृणसक्तो जन्तुविरचितः शूकसंघातवान् निवासोऽन्दुक इत्यन्ये, 'जलचारी कृष्णकीट' इति लक्ष्मणटीप्पणकेनोक्तं; मधुरवर्गः काकोल्यादिः, पयस्या विदारीभेदः, केचिदर्कपुष्पीत्याहुः; अन्ये मधुरवर्गं पयस्यां च न पठन्ति । तैलं वेति तिलतैलं वा पचेत्, एकैकं वा"" । १८-१६ ॥

""पयस्या अर्कपुष्पी"" ॥ २१ ॥

""पतङ्गं रक्तचन्दनम्, अञ्जनं रसाञ्जनम्"" ॥ २७-३१ ॥

अध्यायः १८

""क्षौमम् अतसीतन्तुभिर्व्यूतं, अन्ये वस्त्रान्तरमाहुः; कार्पासं कार्पासतन्तुरचितम्; आविकम् उरभ्ररोमव्यूतं; दुकूलं पट्टवस्त्रम्, अन्ये वल्कलमाहुः; कौशेयं कोशकारकृमिलालोद्भूतं, यत् 'त्रसर' इति लोके; पत्रोर्णो रल्लूकाख्यः कम्बलः, अन्ये तु 'यैर्हरितादीनि देवाङ्गान्युप्यन्ते ते पत्रोर्णाः', 'धौतकौशेयम्' इत्यपरे, 'मागधपौण्ड्रकादिदेशेषु नागवृक्षादयश्चत्वारो वृक्षास्तत्पत्रेभ्यो जातैर्हरिततन्तुभिरूर्णारूपैर्वयते यत्तत् पत्रोर्णम्' इत्येके; चीनपट्टं चीनदेश एवोत्पद्यते, तद्देशजनास्तु 'चीनयुगपट्टम्' इति वदन्ति, स च पत्रोर्णस्यैव भेदः, अन्ये नेत्रमाहुः; चर्म एणादीनाम्, अपरे चर्मवद्बन्धनद्रव्यम्, अथवा सुवर्णपिष्टिकालिप्पचर्मतन्तुभिस्तुरुष्कैर्यानि वयन्ते तानि चर्पशब्देनोच्यन्ते; बाह्यवल्कलमन्त्यं च त्यक्त्वा मध्यं यद्गृह्यते तदन्तर्वल्कलम्; अलाबूशकलं तुम्बीफलकर्परिका; लताविदलं श्यामलतादि पाटितार्धं; केचिद्विदलशब्दं चर्मादिभिः सह सम्बध्नन्ति, अन्ये तु विदलशब्देन वंशवेत्रादिकम्बिकामाहुः"" ॥ १६ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अध्याय: १६

....कलायोऽत्र त्रिपुटकः, एतेन हरेणुसतीनकयोरप्रतिषेधः; निष्पापवशब्देनात्र राजशिम्बी; हरितकमिति "कुठेरशिग्रुसुरससुमुखासुरिभूस्तृणाः। मूलकं चुक्रिका चेति वर्गं हरितकं विदुः"—इति। ....वल्लूरं शुष्कमांसम्। अजाविकानूपौदकमांसवसेति अजाविके प्रसिद्धे; आनूपशब्दो द्विविधः—व्युत्पादितोऽव्युत्पादितश्च; तत्राव्युत्पादितः पञ्चसु कूलचरादिषु वर्तते, अत्र तु व्युत्पादित एव ग्राह्यः, तदेवाह,—अनुगता आपो यस्मिन् सोऽनूपो देशः, तच्चारिणस्त्वानूपाः; ते च कूलचराः प्लवाश्चेति। औदकशब्देन पुनरत्र कोशस्थाः पादिनो मत्स्याश्चोच्यन्ते। वसा शुद्धमांसस्नेहः। कृशरा तिलतण्डुलमाषैः कृता यवागूः। पायसं क्षीरसिद्धास्तण्डुलाः। अन्ये तु 'अजाङ्गलविकारानूपौदकमांसं' इति पठन्ति.... ॥ १६ ॥

....मैरेयं सुरासवयोरेकस्मिन् भाजने संधानम्। अरिष्टमभयारिष्टादि। आसवाः पलाशक्षारोदकासवादयो महाकुष्ठाद्यभिहिताः। सीधुः सस्यकः, सोऽपि नानाप्रकारः पक्वरसिकशीतरसिकादिभेदेन। सुरा लोहितवर्णा पिष्टकिण्वकल्केन किंचित् कलुषा। ....युक्तानि भवन्ति तानि सर्वाण्येव व्रणिभिर्न पातव्यानि.... ॥ १८ ॥

...छत्रातिच्छत्रे द्रोणपुष्पीद्वयं; लाङ्गूली कपिकच्छुः; जटिला मांसी; ब्रह्मचारिणी मुण्डितिका, पत्तङ्गकाष्ठमित्यपरे; लक्ष्मीः शमी, लक्ष्मणेत्यन्ये, विष्णुक्रान्तेत्यपरे; गुहातिगुहे शालपर्णीपृश्निपर्ण्यौ; शतवीर्या शतावरी, नीलदूर्वेत्यन्ये; सहस्रवीर्या श्वेतदूर्वा; सिद्धार्थकाः सर्षपाः ॥ २६ ॥

....जीवन्ती डोडिका, सुनिषण्णकः शिरिबालिका, चतुष्पर्णीत्यन्ये।....विलेपी स्वल्पद्रवा बहुसिक्था। कुल्माषा यवपिष्टमया उत्स्विन्नाः ॥ ३२-३४ ॥

अध्यायः २०

....रक्तशालिः स्वनाम्ना प्रसिद्धः। षष्टिको गौरषष्टिकः। कङ्गुको गौरकृष्णषष्टिकः। मुकुन्दकः कृष्णषष्टिकः। पाण्डुकः पाण्डुकशालिः, स च पाण्डुतुषयुक्तः। सुगन्धको देवशालिः। कलमः शालिविशेषः 'कलाविः' इति लोके प्रसिद्धः। एते षष्टिकादयः शूकधान्येषु। नीवारः प्रसादि (ति) काधान्यमध्ये रक्तशूको भवति, 'तुलजीधान्यम्' इति लोके प्रसिद्धः। उद्दालक आरण्यकोद्रवः। वैणवो वेणुयवः। नीवारादयस्तु कुधान्येषु। एणः कृष्णमृगः। हरिणस्ताम्रवर्णो मृगः। कुरङ्गः 'चतुरङ्ग' इति लोके प्रसिद्धः। मृगमातृका स्वल्पा पृथूदरा चतुरङ्गस्त्री। श्वदंष्ट्रा चतुर्दंष्ट्रोऽतिदुष्टः 'कर्कटक' इति लोके। करालः कस्तूरीमृगः। तित्तिरिः कृष्णातित्तिरिः। कपिञ्जलो गौरतित्तिरिः। वर्तीरः 'घर्घर' इति लोके; वर्तिका तद्भेदः। एणादयो जाङ्गलमृगमांसेषु। लावादयो जाङ्गल-

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पक्षिषु। मङ्गल्या: पाण्डुवर्णा मसूरा:। हरेणु सतीनभेदो वर्तुलकलाय:। आढकी तुवरी। सतीनो वर्तुलक:। मुद्गादयो वैदलसूप्येषु। चिल्ली क्षेत्रवास्तुक:। वास्तुक: टङ्कवास्तुक:। सुनिषण्णक: शिरिवालिका, चतुष्पर्णीत्यपरे। जीवन्ती डोडिका। मण्डूकपर्णी ब्राह्मी'''' ॥ ५ ॥

''''वल्लीफलं कूष्माण्डादिवल्लीजम्; अन्ये शिम्ब्यादिमाहु:; कवकं छत्रकं, 'छत्रकभेदं सुखण्डकसंज्ञम्' इत्यन्ये; करीरो वंशाङ्कुर; अम्लफलानि आम्रातकादीनि; विरोहि विगतरोहंचणकादिकमङ्कुरितं च; पिष्टं तण्डुलपिष्टं; जाम्बवं जम्बूफलं; चिलिचिममत्स्य: शकली लोहिताक्ष: सर्वतो लोहितराजि: प्रायो भूमौ चरति स्थलमीनसंज्ञक:'''' ॥ ८ ॥

''''रोहिणीशाकं कटुकाशाकम्। जातुकशाकं पौष्करशाकम्। बलाकां वारुणी-कुल्माषाभ्यामिति बलाका बकभेद:; वारुणी मद्यापरपर्याय:, कुल्माष उत्स्विन्न-माषादि:। ''''नाडीभङ्गशाकं नाडीपल्लवशाकं, कुक्कुटस्ताम्रचूड:। ''''पित्तं कालखण्डलग्नम्। सुरा मद्यभेद:, कृशरा तिलतण्डुलमाषै: कृता यवागू:, पायसं क्षीरसिद्धास्तण्डुला:। ''''सौवीरकेणेति सौवीवीरकं काञ्जिकविशेषो विरेचनाधिकारे वक्ष्यते। ''''श्वावित् सेहिका'''' ॥ १३ ॥

''''भासो गृध्रविशेष: स्वल्पतुण्डो धूसरवर्ण:'''' ॥ १४ ॥

''''शमनलक्षणमुच्यते;—"न शोधयति यद्दोषान् समान्नोदीरयत्यपि। समीकरोति क्रुद्धांश्च तत् संशमनमुच्यते"—इति'''' ॥ २१ ॥

अध्याय: २१

''''वल्लूरं शुष्कमांसम्। वरक: वरटिका कुधान्यविशेष:। उद्दालक: अरण्य-कोद्रव:। नीवार: प्रसातिका, धान्यमध्ये रक्तशूको भवति; 'उलजीधान्यम्' इति लोके। आढकी तुवरी। हरेणु: वर्तुलकलाय:। कलाय: त्रिपुटक:। निष्पावक: राजशिम्बि:। अनशनम्'''' ॥ १९ ॥

''''विदाहीति यदम्लोद्गारदाहतृष्णाप्रभृतीनुदीर्य कृच्छ्रात् पाकमुपगच्छति तद्विदाहि। हरितकशाकमिति "कुटेरशिग्रुसुरससुमुखासुरिभूस्तृणा:। चुक्राकश्चुक्रिका चेति वर्गं हरितकं विदु:"—इति। दधि सस्नेहं गव्यं दधि। कूर्चिका विग्रथितं तक्रम्। मस्तु दधिमस्तु। सौवीरकं निस्तुषयवत्रिवृदादिकृतं संधानं धान्याम्लं वा। सुराविकारा: पैष्टिकादय:। अम्लफलानि आम्रातकादीनि। कट्वरमिति अस्नेहं दधि। अन्ये भाषन्ते,—"सौवीराम्लमथात्यम्लं काञ्जिकं कट्वरं विदु:। अन्ये तु तदधोभागं तक्रं चात्यम्लतांगतम् ॥ सस्नेहं दधिजं तक्र-माहुरन्ये तु कट्वरम्"—इति'''' ॥ २१ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

...अभिष्यन्दि दोषधातुमलस्रोतसामतिशयक्लेदप्राप्तिजननम्। हायनको घोटकपुच्छः, स च शालिविशेषः। यवकः शूकधान्यविशेषः, तस्य च यवाकारास्तण्डुलाः। नैषधः 'कोरक' इत्याख्यायते, स च धान्यविशेषः। इत्कटः खगली। पिष्टं तण्डुलपिष्टम्। कृशरा तिलतण्डुलमाषैः कृता यवागूः। पायसः क्षीरसिद्धास्तण्डुलाः। बिसं पद्ममूलं, 'बिसाण्ड' इति लोके। मृणालं पद्ममूलात् स्थूलः प्ररोहाङ्कुरः। शृङ्गाटकं जलमध्ये त्रिकण्टकम्। मधुरवल्लीफलमिति मधुरफलं तालनारिकेलादि; वल्लीफलम् अलाबूप्रभृति, अन्ये कूष्माण्डकादीनि ॥ २३ ॥

अध्यायः २२

...एर्वारुकरसः कर्कटिकारसः; काञ्जिकप्रसाद इति काञ्जिकस्योपर्यच्छः; आरुकमनेनैव नाम्ना प्रसिद्धम् ॥ ८ ॥

...पुलाकोदकं गवेधुकोदकं, गवेधुकस्तृणविशेषः, 'जलगोधूम' इति लोके; अन्ये तु पुलाकशब्देनाप्राप्तपाकं धान्यमाहुः। ...कलायोऽत्र त्रिपुटकः... ॥ ९-१० ॥

अध्यायः २५

...अश्मन्तकः अम्ललोटकसदृशो वृक्षः। क्षौममिति क्षुमा अतसी तस्या इदं क्षौमम्। ...मूर्वा चीरस्नायुः, या पूर्वदेशे गुणान् कुर्वन्ति धनुषाम्। अन्ये कोविदारसदृशयुग्मपत्रां लताविशेषां मूर्वामाचक्षते... ॥ २०-२६ ॥

...अञ्जनं सौवीराञ्जनम्। ....क्षौमध्यामेनेति अतसीभववस्त्रभस्मना... ॥२७-२८॥

अध्यायः २६

...रैतिकमिति रीतिः पित्तलभेदः, तन्मयं रैतिकम्। केचिदत्र 'रैतिकं' इति पदं विहाय 'कृष्णायस्त्रपुसीसकम्' इति पठन्ति ॥ २० ॥

...विषाणं शृङ्गं, दारु काष्ठम्, उपलः पाषाणः... ॥ २२ ॥

अध्यायः २७

...अयस्कान्तः पाषाणविशेषः, यद्यप्ययस्कान्त इति सामान्येनोपात्तस्तथाऽप्यत्राकर्षको ग्राह्यः; हर्षस्तुष्टिः ॥ ४ ॥

...कुशा वंशवेत्रादिकम्बी... ॥ १२ ॥

अध्यायः २९

...उपलः पाषाणः, भस्मेति दग्धकाष्ठादिक्षारः... ॥ ९-१४ ॥

....वृषो वृषभः। ...मोदका लड्डुकाः। हिरण्यं स्वर्णम्, अन्ये कपर्दकान्याहुः; अक्षता लाजाः, अन्ये क्षतानि यवधान्यान्याहुः। ...वाजी घोटकः। चाषः करटासः। शिखी मयूरः... ॥ २७-३१ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

...पारिभद्रको निम्बवृक्षः; कोविदारः काञ्चनारः। ....सुरा पिष्टमयी न तु मद्यं.... ।। ५४-६६ ।।

...चणकादिपिष्टकृता सतिला तैलभृष्टा शष्कुलीत्युच्यते... ।। ६८-७० ।।

...उरगः सर्पः... ।। ७५-८१ ।।

अध्यायः ३०

...श्वा कुक्कुरः; कङ्कः कङ्कमल्लः; तस्य लक्षणमाह,—"कङ्कः स्यात् कङ्कमल्लाख्यो बाणपक्षार्हपक्षकः। लोहपृष्ठो दीर्घपादः पक्षाधःपाण्डुवर्णभाक्—" इति... ।। १५-२३ ।।

अध्यायः ३२

...प्रवालो विद्रुमः, स च समुद्रजातोऽत्यन्तरक्तो वल्लीविशेषः.... ।। ४ ।।

अध्यायः ३३

...सिकता वालुका... ।। १२ ।।

अध्यायः ३६

...संशमनानीति यद्द्रव्यं न वामयति न विरेचयति व्याधिना सहैकीभूय तत्स्थमेव व्याधिमुपशमयति तत् संशमनमुच्यते ।। ६ ।।

अध्यायः ३७

...मातुलुङ्गी बीजपूरकः; अग्निमन्थः अरणी, भद्रदारु देवदारु, महौषधं शुण्ठी, अहिंस्रा बृहदहिंस्रा, रास्ना सुरभिः। ....अजगन्धा बोथयिका, लतौषधीत्येके, अन्ये यवानिकामाहुः, ...काला अहिंस्रा, सरला अरुणमूला त्रिवृत्, एकैषिका शुक्लमूला त्रिवृत् अजश्रृङ्गी, कर्कटश्रृङ्गी, अन्ये अजश्रृङ्गी छगलविषाणिका उत्तमारणी 'मेणिका' इति लोके। ....पथ्या हरीतकी, पिण्डीतको मदनः, अनन्ता दुरालभा.... ।। ३-७ ।।

....शिग्रुः शोभाञ्जनकः,.... अतसी 'अलसी' इति लोके प्रसिद्धा.... ।। ६ ।।

....चिरबिल्वो वृद्धकरञ्जः 'चिरिहिलि' इति लोके, अग्निकः कलिकारिका अन्ये भल्लातकमाहुः, दन्ती दन्तिनी, ...हयमारः करवीरः। ....कपोतो वनवासी पाण्डुकः, कङ्कः कङ्कमल्लः, न पुनः काकः गृध्रो मांसाशी पक्षिविशेषः.... ।।१०।।

....शङ्खिनी यवतिक्ताभेदः सुदुग्धा बृहत्पत्राः अङ्कोठः संग्राही चीरितस्वल्पपत्रः, 'अङ्कोल्ल' इति लोके सुमना जाती, करवीरः प्रसिद्धः सुवर्चला सूर्यावर्तः, सौञ्च (च) लीति लोके.... ।। १२ ।।

....गवाक्षी इन्द्रवारुणी, लाङ्गलाह्वया कलिकारिका, पूतीकः चिरबिल्वः 'कण्टकी विटपकरञ्ज' इत्येके, हरेणवो रेणुकाः, लवणानि सैन्धवसौवर्चल-

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बिडगडसामुद्रिकाणि पञ्च; अन्ये गडस्थाने काललवणेन सह पञ्चसंख्यामाहुः, काललवणं तु निर्गन्धं सौवर्चलभेदः, सुराष्ट्रजा तुम्बुरुमृत् 'तूरी' इति लोके; अपरे सामान्येन कृष्णमृत्तिकामाहुः.... ॥ १३-१४ ॥

....अर्कः अर्कमूलम्, उत्तमा त्रिफला, अन्ये तु पुनरर्कोत्तममित्यभिन्नपदेन मन्दारकमाहुः, स्नुहीक्षीरं सेहुण्डदुग्धं, क्षारोत्तमानि क्षारश्रेष्ठद्रव्याणि मुष्कककुट-जपलाशाश्वकर्णादीनि जातीमूलं जात्या जटा; अन्ये 'जातुकन्द' इति पठन्ति तत्र जातुकन्दो गुग्गुलुक उत्तरापथे प्रसिद्धः.... ॥ १६ ॥

....मयूरकोऽपामार्गः, राजवृक्षः किरमालकः। कोशातकी घोषकः, 'घुसुण्डी' इति लोके.... ॥ १७-१८ ॥

....श्रीवेष्टकः सरलरसो नवनीतपिण्डप्रायः, 'गुग्गुली' इति लोके प्रसिद्धः, सर्जरसः 'राला' इति लोके प्रसिद्धः, सरलेः सरलवृक्षत्वचीत्यर्थः। सारेष्विति अनुक्तेषु सालसारादिसारेष्वित्यर्थः। ....जातुकन्दो गुग्गुलुः.... ॥ २१ ॥

....सोमः सोम एव, 'सोमवल्कल' इत्यन्ये, अपरे 'सोमा ब्राह्मी' इत्याहुः; अमृता गुडूची, क्षीरिप्ररोहा न्यग्रोधोदुम्बरादीनामङ्कुराः.... ॥ २२-२३ ॥

....पृथक्पर्णी पृश्निपर्णी, आत्मगुप्ता कपिकच्छूः, मालती जाती; सिता शर्करा, श्वेतदूर्वेत्यन्ये.... ॥ २५ ॥

....कालानुसार्यं तगरं, शैलजमिति केचित्.... ॥ २६ ॥

....कङ्गुकाः कङ्गवः, 'अन्नविशेषाः' इत्यपरे। श्रवणाह्वया मुण्डितिका। धवः शकटाख्यः, अनेनैव नाम्ना प्रसिद्धः, अश्वकर्णः पूर्वदेशे गन्धमुण्डोऽश्वत्थ-सदृशवृक्षः.... ॥ २७-२८ ॥

....अपामार्गस्य मूलं शीतलं गृह्यते, न तु फलं, तस्योष्णवीर्यत्वात्। तालपत्री मुशली। सुवर्चला सूर्यावर्तः, अस्या अपि मूलं न तु फलं, तस्योष्णवीर्यत्वात्। ....उत्सादनं मांसवर्धनं, लेपप्रयोगादुत्सादनं भवति... ॥ ३० ॥

....कुरुविन्दो लोहितरत्नं 'पद्मराग' इत्युच्यते। कुक्कुटाण्डकपालानि कुक्कुटाण्डकर्पराणि। सुमनोमुकुलानि चेति जातिकलिकेत्यर्थः.... ॥ ३१-३२ ॥

अध्यायः ३८

...विदारिगन्धा शालपर्णी, विदारी विपादिककन्दः कोहलाकारो लोहित-कुसुमः, स च द्विविधः—दीर्घकन्दो बहुक्षीरः, हस्तिपादकोऽल्पक्षीर इति। विश्वदेवा गाङ्गेरुकी प्रसिद्धा, 'गुडशर्करा (गुलशकरी)' इति पूर्वदेशे, अन्ये सितकुसुमां बलामाहुः। सहदेवी बलाभेदः पीतपुष्पा 'काङ्कसी' इति लोके, अन्ये बलां नीलपुष्पामाहुः। श्वदंष्ट्रा गोक्षुरकः। पृश्निपर्णी पृथक्पर्णी 'पीठवनी' इति

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लोके। शतावरी सूक्ष्मपत्रा 'शताउरी' इति लोके। सारिवा जम्बूपत्रा दुग्धगर्भा वल्ली स्वनामप्रसिद्धा। कृष्णसारिवा छिन्नहेण्टापत्रसदृशच्छदा चन्दनगन्धा 'कालवेली' इति लोके, केचित् कृष्णसारिवां न पठन्ति। जीवकः कूर्चशीर्षकः स्वनामख्यातः। ऋषभको वृषभकः, अयमपि स्वनामख्यातः। महासहा माषपर्णी। क्षुद्रसहा मुद्गपर्णी। बृहत्यौ सूक्ष्मफला स्थूलफला च। पुनर्नवा वर्षाभूः 'साटडी' इति लोके। एरण्डः स्वनामप्रसिद्धः। हंसपादी मधुश्रवा हंसपदाकारपत्रा पीतपुष्पा जलयु (मु)क्तदेशजाता 'हंसपाई' इति लोके प्रसिद्धा। वृश्चिकाली कण्टकितमेषशृङ्गयुवाकारफला पाठापत्रा ईषद्रोमशा श्वेतपुष्पगुच्छा दक्षिणावर्तवल्ली मेषशृङ्गीभेदः, वृश्चियाशाकमन्ये। ऋषभी कपिकच्छुः'''' ॥ ४-५ ॥

''''आरग्वधः किरमालिकः, मदनः पिण्डीतकः, 'मयणफल' इति लोके, गोपघोण्टा कर्कोटी, बदरभेद इत्यन्ये, 'ग्रामकोलिका' इति प्रसिद्धा, पुगभेदमपरे, कण्टकी विकङ्कतः वृक्षकण्टकारिकेति प्रसिद्धा, 'कांकई' इति लोके, कुटज इन्द्रवृक्षः, पाठा अविद्धकरणी, 'पाढ' इति लोके, पाटला वसन्तदूती स्वनामप्रसिद्धाः मूर्वा धनुर्गुणोपयोग्या, 'दूधउ' इति लोके, अन्ये चोरस्नायुमाहुः, इन्द्रयवः कुटजफलं, सप्तपर्णः शाल्मलीसदृशपर्णो गजमदगन्धपुष्पः शरदि विकसनशील उच्चैर्वृक्षः 'सातवन' इति लोके, निम्बः प्रसिद्धः, कुरुण्टकः पीतपुष्पः, 'कण्टाशेलुआ' इति लोके, नीलपुष्पः स एव दासीकुरुण्टकः, गुडूची प्रसिद्धा, चित्रकः प्रसिद्धः, शार्ङ्ग(ङ्र्ग)ष्टा काकजङ्घा 'विकसवनी' इति लोके, काकमाचीत्यन्ये, अन्ये तु शाङ्र्गेष्टा काकतिक्ता गौरवर्तुलावगुण्ठितफला 'चिरपोटिका' इति प्रसिद्धा, 'भुरुदाका' इति पूर्वदेशे, काकादनीत्यपरे, सा च गुञ्जेति प्रसिद्धाः करञ्जद्वयमिति एकश्चिरबिल्वः, द्वितीयः कण्टकी विटपकरञ्जः, पटोलः कुलकः स्वनामख्यातः, किराततिक्तको भूनिम्बः, सुषवी कारवेल्लकः, अन्ये तु पानीयवल्लीमाहुः ॥ ६-७ ॥

''''सालः शङ्कुः, तस्य सारः सालसारः; अजकर्णः सर्जः सालभेद एव; खदिरो गायत्री स्वनामख्यातः; कदरः खदिराकारः श्वेतसारः; क्रमुकः पूगः, केचित् 'क्रमुग' इति पठन्ति, अत्रापि स एवार्थः, वृक्षरोध्र इत्यन्ये साराधिकारात्; भूर्जो मृदुत्वक् स्वनामख्यातः, केचित् भूर्जस्थाने 'स्फूर्जक' इति पठन्ति, तत्र स्फूर्जकः श्योनाकनाम्ना प्रसिद्धः (लकुचाकारपत्रकाण्डः); मेषशृङ्गः कर्कटशृङ्गः, स च पुत्रञ्जीवकसदृशस्तरुविशेषः; तिनिशः स्यन्दनः, 'सादण' इति लोके प्रसिद्धः; चन्दनं श्रीचन्दनं 'श्रीखण्ड' इति प्रसिद्धं; कुचन्दनं रक्तचन्दनं; शिंशपा कृष्णसारा 'सीसई' इति लोके; शिरीषो विषघाती; 'शिरस' इति लोके; असनो बीजकः पूर्वदेशे प्रसिद्धः; धवः शकटाख्यः स्वनामप्रसिद्धः; अर्जुनः

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ककुभः; तालः स्वनामख्यातः; शाकः पूर्वदेशे प्रसिद्धो महाखरपत्रः; नक्तमालो बृहत्करञ्जः; पूतीकः चिरबिल्वः; अश्वकर्णो गन्धमुण्डोऽश्वत्थसदृशः पूर्वदेशे प्रसिद्धः; अगुरु स्वनामख्यातं; कालीयकं 'मलेन्द्रीचन्दनम्' इति प्रसिद्धम्। विनाशनहरणविशोषणानामर्थभेदमाहुः'''' ॥ ८-९ ॥

''''वरुणस्तिक्तसारः शाकद्रुमः 'वरुण' इति लोके; आर्तगलः ककुभः सुगन्धमूलः 'कवहा (कौहा)' इति नाम्ना पूर्वदेशे प्रसिद्धः; शिग्रुः शोभाञ्जनकः; मधुशिग्र रक्तशोभाञ्जनकः; तर्कारी अरणिका; मेषशृङ्गी कर्कटशृङ्गी, पूतीकश्चिरबिल्वः, नक्तमालो बृहत्करञ्जः; मोरटोङ्कोल्लपुष्पो 'मोइहर' इति लोके, हस्तिकर्णपलाश इत्यन्ये, अग्निमन्थस्तेजोवृक्षः पूर्वदेशे 'आगथ' इति प्रसिद्धः; सैरेयकद्वयं रक्तपुष्पनीलपुष्पकण्टशेलुआद्वयं, बिम्बी ओष्ठोपमफला 'तिण्डुरिका' इति प्रसिद्धा, चित्रकः प्रसिद्धः, शतावरी प्रसिद्धा, वसुको बुकः 'बकपुष्प' इति लोके, अन्ये तु वसुकोऽर्कः, वशिरो मर्कटपिप्पली तृणजातिः 'अपामार्ग' इति प्रसिद्धः, बिल्वः श्रीफलः, अजशृङ्गी छगलविषाणिका उत्तमारणी 'मेण्ढिका' इति लोके, दर्भः, कुशः। बृहतीद्वयं कण्टकारिकाद्वयम्—एका स्थूलफला; द्वितीया ह्रस्वफला ॥ १०-११ ॥

''''वीरतरुः शरः, अन्ये तु वीरतरुः 'बेल्लन्तर' इति नाम्ना प्रसिद्धो जाङ्गलदेशे नर्मदातटे चर्मण्वतीनदीसमीपे च, तल्लक्षणमुच्यते,—"वेल्लन्तरुर्जगति वीरतरुः प्रसिद्धः श्वेतासितारुणविलोहितपीतपुष्पः। आदारितुल्यकुसुमः शमिसूक्ष्मपत्रः स्यात् कण्टकी विजलदेशज एष वृक्षः— इति, सहचरद्वयं कण्टशेलुद्वयं, दर्भः प्रसिद्धः; वृक्षादनी बन्दाकः 'कवलेखू' इति लोके, वृक्षकलम्बुकमपरे, गुन्द्रा पादरकभेदो 'गोदर' इति लोके, नलो दूर्वाकाराङ्कुरोन्तः शुषिरः स्वनामख्यातः; कुशो ह्रस्वदर्भः, काशः चामरपुष्पः, अश्मभेदकः पाषाणभेदकः; अग्निमन्थः तेजोवृक्षः, 'अङ्गेशूर' इति लोके; मोरटोङ्कोल्लपुष्पः, हस्तिकर्णपलाश इत्येके, इक्षुमूलमित्यपरे; वसुको बुकः 'बकपुष्प' इति लोके; वसिरः अपामार्गः; सूर्यावर्तभेद इत्येके; भल्लूकः श्योनाकः 'शोणा' इति लोके; कुरण्टिका कृष्णसूक्ष्मफला 'सिरिवालिका' इति लोके; इन्दीवरोऽपि तद्भेदो दीर्घपत्रो बहुलपुष्पः; कपोतवङ्का सुवर्चला, अन्ये 'शिरीषसदृशपत्रा स्वल्पविटपा' इति द्रव्यान्तरमाहुः; श्वदंष्ट्रा गोक्षुरकः'''' ॥ १२-१३ ॥

''''रोध्रो लाक्षाप्रसादनो रक्तः; सावरलोध्रः श्वेतस्थूलत्वक्; पलाशः किंशुक; कुटन्नटः स्योनाकः; अशोको लोहितकुसुमः स्वनामख्यातः; फञ्जी भार्गी; कट्फलः 'कायफल' इति लोके; एलवालुकं हरिवालुकं कृष्णगन्धिकट्फलसदृशं; शल्लकी गजभक्ष्या 'साल' इति लोके; जिङ्गिनी गुडमज्जनिका: 'गुलदुगि' इति लोके,

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पूर्वदेशे स्वनामप्रसिद्ध कदम्बो वृक्षकदम्बः; सालः सर्जः; कदली रम्भा स्वनामप्रसिद्धा। स्तम्भी अतिसारादेः स्तम्भनः ॥ १४-१५ ॥

....मुष्ककः क्षारवृक्षः 'मोखक' इति लोके; पलाशः किंशुकः; धवः स्वनामप्रसिद्धः; चित्रकोऽपि स्वनाम्नैव प्रसिद्धः; मदनः पिण्डीतकः; वृक्षकः कुटजः; 'मदनवृक्ष' इत्यन्ये पठन्ति, मदनवृक्ष इत्यत्र वृक्षशब्दनिर्देशः फलप्रतिषेधार्थमिति व्याख्यानयन्ति; शिंशपा कृष्णसारा स्वनामख्याता; वज्रवृक्षः 'सेहुण्ड' इति लोके; त्रिफला हरीतक्यामलकबिभीतकानि ॥ २०-२१ ॥

....चव्यं हस्तिपिप्पलीमूलं स्वनामख्यातं; शृङ्गवेरं शुण्ठी; हस्तिपिप्पली गजपिप्पली; अजमोदा स्वनामख्याता, अन्ये यवानिकामाहुः; महानिम्बफलमिति महानिम्बो द्रेक्का 'पर्वतनिम्ब' इति लोके; मधुरसा मूर्वा.... ॥ २२-२३ ॥

....ध्यामकं कत्तृणं 'रोहिष' इति लोके; त्वक् वराङ्गं 'गुडतज' इति लोके; पत्रं पत्रकं; नागपुष्पं नागकेशरम्, अन्ये नागकेशरपुष्पसमपुष्पो महातरुरित्याहुः; हरेणुका रेणुका; व्याघ्रनखो बृहन्नखः, बृहन्नखीत्यन्ये, शुक्तिस्तद्भेदोऽल्पनखः चण्डा स्वनामख्यातेषत्कृष्णा चोरकभेदः अजमोदाकारा; स्थौणेयकं थुणेरकः; श्रीवेष्टकः सरलचोपः 'गुग्गुली' इति लोके; चोचस्त्वग्भेदो वनवासिकात्वक्; चोरकः स्वनामख्यातः ग्रन्थिपर्णकभेदो ग्रन्थिपर्णाकार एव; सर्जः सर्जरसः 'राल' इति प्रसिद्धः अन्तलोपात्; रसः गन्धरसः 'बोल' इति लोके; तुरुष्कः सिह्लकः; कुन्दुरकः शल्लकीचोपः; स्पृक्का कुटिलपुष्पा सुगन्धिद्रव्यमौत्तरापथिकं; भद्रदारु देवदारु; पुन्नागः सुरपर्णिका; सुगन्धिपुष्पा दक्षिणापथे 'सुरपर्ति' (सुरङ्गी) नाम्ना प्रतीता; केशरं बकुलं, केचित् समुदितं व्याख्यानयन्ति—पुन्नागकेशरं पद्मकेशरमित्यर्थः; अन्ये त्वेवं पठन्ति — 'पुन्नागनागकेशरं च' इति, पुन्नागं देववल्लभं राजचम्पकमिति लोके; नागकेशरं स्वनामप्रसिद्धम्... ॥ २४-२५ ॥

....भद्रदारु देवदारु। कलशी पृश्निपर्णी.... ॥ २६-२८ ॥

....श्यामा श्वेता त्रिवृता; महाश्यामा वृद्धदारकः; त्रिवृत् रक्तमूला त्रिवृत् 'निशोथ' इति लोके; दन्ती दन्तिनी; शङ्खिनी यवतिक्ताभेदः, 'श्वेतबुध्ना' इत्येके; तिल्वको रोध्रः, अन्ये तिल्वको रोध्राकारो बृहत्पत्रो रक्तत्वक्को वैरेचनिकः, कम्पिल्लको रोचनिका, स्वनामख्यातः, रम्यको द्रेक्का 'महानिम्ब' इति लोके प्रसिद्धः, पटोलमूलमित्येके, क्रमुकः पूगफलं; पुत्रश्रेणी द्रवन्ती एरण्डसदृशफलपत्राऽल्पविटपा 'शम्बरी' इति लोके, गवाक्षी इन्द्रवारुणी, राजवृक्षः किरमालकः, करञ्जद्वयं वृक्षविटपकरञ्जौ, गुडूची प्रसिद्धा सप्तला सातला स्नुहीभेदः छगलान्त्री वृद्धदार(रु) कभेदः, बुध्नाभेद इत्यपरे, सुधा सेहुण्डः, सुवर्णक्षीरी अनन्तासदृशपत्रा, कङ्गुष्ठमित्यपरे ॥ २९-३० ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

''''कुचन्दनं रक्तचन्दनं; मूर्वा दुधीड:, 'चौरस्नायुक' इत्येके''''।। ३३-३४ ।।

''''काकोली वीरा स्वनाम्ना प्रसिद्धा, क्षीरकाकोली तद्भेद: स्वनामख्याता; जीवक: स्वनामप्रसिद्ध:, ऋषभ: स्वनामख्यात:, मुद्गपर्णी 'मुगवनी' इति लोके माषपर्णी 'माषवनी' इति लोके, 'अरण्यमाषस्तम्ब' इत्येके, मेदा महामेदा च स्वनामख्याता छिन्नरुहा गुडूची; तुगाक्षीरी वंशलोचना, पद्मकं पद्मकाष्ठं, प्रपौण्डरीकं स्वनामख्यातं यष्टीमधुद्रव्यादीषत्स्थूलं मधुररसं नेत्राश्च्योतनार्हं द्रव्यम्, अन्ये श्रीपुष्पमाहु:, मृद्वीका द्राक्षा; जीवन्ती 'डोडिका' इति लोके, लताऽर्कफलाकारसक्षीरफला, अन्ये सुवर्णजीवन्तीमाहु: । जीवन: प्राणधारण:; बृंहण: शरीरवृद्धिकर:'''' ।। ३५-३६ ।।

'''ऊषक: क्षारमृत्तिका वाराणसीसमीपे बडहरदेशे बाहुल्येन भवति, अन्ये तद्भवं द्रव्यान्तरमाहु:, कासीसद्वयं कासीसं भस्मसदृशं किञ्चिदम्ललवणरसं, द्वितीयं पुष्पकासीसमीषत्पीतं तुवररसं तद्भेद एव, तुत्थकं कर्परिकातुत्थं 'खपरिया' इति लोके, अन्ये मयूरग्रीवमाहु:''' ।। ३७-३८ ।।

''''चन्दनं रक्तचन्दनम्, अन्ये पद्ममिति पठन्ति, तत्र पद्मं पद्मपुष्पम् ।। ३९-४० ।।

''''अञ्जनं सौवीराञ्जनं, रसाञ्जनं दारुहरिद्राक्वाथेन कृत्रिमं अन्ये त्वेवं वदन्ति—रसाञ्जनं द्विविधं स्रोतोऽञ्जनं कृष्णपाषाणाकृति धातुद्रव्यम्, अन्यद्दारुहरिद्राक्वाथेन कृत्रिमं पीतलोहितम्, अत्र धातुद्रव्यमेव सौवीराञ्जनसाहचर्यात्, नागपुष्पं नागकेशरं, नलदं मांसी, नलिनकेशराणि पद्मकेशराणि'''' ।। ४१-४२ ।।

''''कट्फल: सोमवल्क: 'कायफल' इति लोके, राजादन: क्षीरिका, कतकफलं स्वनामख्यातं शशकपुरीषप्रतिमफलमम्बुप्रसादनं, शाकफलानि शाको मसृणकर्कशोदरपृष्ठदलो वृक्षविशेष:, तस्य फलानि'''' ।। ४३-४४ ।।

''''समङ्गाञ्जलिकारिका 'लज्जालु:' इति लोके: पुन्नागस्तुङ्ग: स्वनामख्यात: अन्ये सुरपर्णिका सुगन्धिपुष्पा दक्षिणापथे सुरपती (सुरंगी) ति प्रसिद्धा नागपुष्पं नागकेशरं, चन्दनंरक्तचन्दनम्, कुचन्दनं मलयाद्रिचन्दनं, मोचरस: शाल्मलीचुप: रसाञ्जन दार्वीक्वाथसमुद्भवं स्वनामख्यातं, कुम्भीक: श्लक्ष्णत्वक्को रौमश: कुम्भीनामा, वृक्षो यस्य त्वग् वस्त्राकारा भवति, अन्ये पाटलामाहु:; अपरे स्वल्पविटपमाहु:, स्रोतोजं सौवीराञ्जनं, पद्मकेशर स्वनामख्यातं, योजनवल्ली ''''मञ्जिष्ठा, दीर्घमूला दुरालभा, शालिपर्णीत्यपरे'''' । अम्बष्ठा माचिका 'साङ्कुरड' इति पश्चिमे प्रसिद्धा, पाठा इत्यपरे, धातकीकुसुमं धातकीपुष्पं समङ्गाञ्जलिकारिका 'लज्जालु:' इति लोके, कट्वङ्गोऽरलुक: बिल्वपेशिका

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बालबिल्वगिरः, महारोध्रं केचिद् पठन्ति, सावररोध्रो लोध्रस्तस्यैव ग्राहित्वात् नेतरस्तस्य विरेचनत्वात्, पलाशः किंशुकः, नन्दीवृक्षः काश्मीरी, अन्ये गर्दभाण्डमाहुः, पद्मकेशरं··· ॥ ४५-४७ ॥

····न्यग्रोधो वटः, उदुम्बरः प्रसिद्धः, अश्वत्थः पिप्पलः प्लक्षः; पर्कटी; मधुकं प्रसिद्धं; कपीतन आम्रातकः, ककुभः अर्जुनः, आम्रः प्रसिद्धः ··· चोरकपत्रो लाक्षावृक्षः, जम्बूद्वयमेका राजजम्बूर्बृहत्फलाः द्वितीया काकजम्बूः स्वल्पफला, द्वयग्रहणाद्भूमिजम्ब्वास्तृतीयायाः प्रतिषेधः; प्रियालः सारद्रुमः; मधूको गुडपुष्पो 'महुवा' इति लोके, रोहिणी कट्फलः, वञ्जुलो वेतसः, कदम्बः प्रसिद्धः, बदरी प्रसिद्धा, तिन्दुकी तिन्दुकवृक्षः, 'टिम्बरुयणि' इति लोके, नन्दीवृक्षोऽत्र प्ररोही गर्दभाण्डः 'पार्श्वपिप्पल' इति लोके··· ॥ ४८-४९ ॥

····कुस्तुम्बुरु धान्यकं, चन्दनं रक्तचन्दनम्···· ॥ ५०-५१ ॥

उत्पलेत्यादि । उत्पलं नीलोत्पलं,····कुमुदं श्वेतोत्पलं, सौगन्धिकं नीलोत्पलाकारवर्णमुत्पलं सुगन्धि च, कुवलयमीषन्नीलधवलं, पुण्डरीकं श्वेतपद्मं, मधुकं यष्टीमधुकम्···· ॥ ५२-५३ ॥

····हेमवती श्वेतवचा, स्वनामख्याताऽरुणवर्णा, शाङ्र्ग (ङ्र्गे)ष्टा काकतिक्ता गौरवर्तुलावगुण्ठितफला 'चिरपोटिका' इति प्रसिद्धा, 'झझरुष' इति पूर्वदेशे, काकजङ्घामन्ये, काकमाचीत्यपरे; द्राविडी एला । स्तन्यशोधन इति स्त्रीक्षीरप्रसादनः···· ॥ ५४-५५ ॥

—त्रपु वङ्गं, सीसं नागं, ताम्रं प्रसिद्धं; रजतं रूप्यं, ····कृष्णलोहं, तीक्ष्णलोहं,···· लोहमलः प्रसिद्धः 'काट' इति लोके···· ॥ ६२-६३ ॥

···आरेवतः किरमालकः, कुटज इन्द्रयवः, अश्वमारकः करवीरः, कट्फलः सोमकल्कलः 'कायफल' इति लोकेः सप्तच्छदः सप्तपर्णः 'सातवन' इति लोके; मालती जाती··· ॥ ६४-६५ ॥

···त्रिकण्टको गोक्षुरकः, विदारिगन्धा शालपर्णी ·· ॥ ६६-६७ ॥

···अग्निमन्थः 'अग्निवधू' इति लोके, टुण्टुकः स्योनाकः···॥ ६८-६९ ॥

विदारी विदारीकन्दः, रजनी हरिद्रा, 'रञ्जनी' इत्यन्ये पठन्ति, रञ्जनी शिरहलकः, अजश्रृङ्गी मेढिका, कर्कटश्रृङ्गीत्यपरे । ···करमर्दी क्षीरफला 'करमदी' इति लोके, त्रिकण्टः गोक्षुरकः, सैरेयकः कण्टसेलियाकः, गृध्रनखो हिंस्रा··· ॥ ७२-७४ ॥

···कुशो ह्रस्वो मृदुः सूचीपत्र, काशश्चमरपत्रः, ···दर्भः पृथुलः खरपत्रो दीर्घः, काण्डेक्षुका महती खगाली, अन्ये इक्षुमेवाहुः, अन्ये तु पठन्ति 'काण्डश्च' इति तत्र काण्डः' शरः··· ॥ ७५-७६ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

"...कषायशब्देनात्र शृतशीतस्वफाण्टकल्कभेदाः पञ्चोच्यन्ते। पीयन्त इति पानका यूषमण्डादयः कथ्यन्ते..."॥ ७६-८० ॥

अध्यायः ३६

"...व्याधिप्रत्यनीका द्रव्यगणा उक्ताः, संशोधनसंशमनीये तु दोषप्रत्यनीकप्रायाः पञ्चकर्मोपयोगिनः शोधनद्रव्यसंग्रहगणा वातादिशमनद्रव्यगणाश्च कथयितव्या इति, तत्र द्विविधं संशोधनं —वमनं विरेचनं च, तत्र वमनपूर्वकत्वाद्विरेचनस्य प्रथमं वमन द्रव्यगणमभिधातुमाह—मदनेत्यादि। जीमूतको देवदाली, इक्ष्वाकुः कटुकालाबूः, धामार्गवः पीतपुष्पा कोषातकी, कृतवेधनः कोषातकीभेदः सर्षपाः श्वेतसर्षपा विशेषेण वमनार्हाः, कोविदारः काञ्चनारः कर्बुदारः श्लेष्मान्तकः 'बवहार' इति 'लिहूसाडक' इति च देशभाषया प्रसिद्धः, अरिष्टो निम्बः, विदुलो वेतसः, बन्धुजीवो मध्याह्नपुष्पकः 'मरुनीया' इति लोके, श्वेता श्वेतवचा, शणपुष्पी शणसदृशविटपः 'सणहुली' इति लोके, बिम्बी किन्दुरिका, वचा द्वितीयाऽरुणा, मृगेर्वारुरिन्द्रवारुणी, चित्रा चित्राण्डिका पटोलफलाकारफला आरण्यचण्डकेत्यर्थः; अन्ये द्रवन्तीमाहुः। "...ऊर्ध्वभागहराणि वमनकराणीत्यर्थः...." ॥ ३ ॥

"...त्रिवृत् रक्तमूला 'निसोतृ' इति लोके, श्यामा कृष्णमूला त्रिवृत्, दन्ती दन्तिनी; द्रवन्ती दन्तीभेदः 'संवरी' इति लोके, सप्तला सातला सेहुण्डभेदः, अपरे बुध्नामाहुः, शङ्खिनी यवतिक्ताभेदः, श्वेतबुध्नेत्यपरे, विषाणिका मेषशृङ्गी, गवाक्षी श्वेतपुष्पेन्द्रवारुणी, छगलान्त्री वृद्धदार(रु) कः, स्नुक् सेहुण्डः, सुवर्णक्षीर्यनन्तासदृशपत्रा 'हियावलि' इति लोके, 'कङ्गुष्ठ' इत्यपरे, किणिही कटभी, तिल्वकः स्वल्परोध्रः, कम्पिल्लको रोचनिकः स्वनामख्यातः, रम्यको द्रेक्का 'बकाइणि' इति लोके, पटोलमूलमित्यपरे, नीलिनी नीलबुध्ना (ह्ना), 'श्रीफलिका' इति लोके, चतुरङ्गुलः किरमालकः, अत्रैके चतुरङ्गुलस्थाने 'पञ्चाङ्गुल' इति पठन्ति, तेषां मते पञ्चाङ्गुल एरण्डः, अन्ये तु पञ्चाङ्गुलशब्देन पटोलफलसदृशफलां लतां स्निग्धपत्रां शारदफलामाहुः; पूतीकश्चिरबिल्वः; महावृक्षः सेहुण्डभेदः, तस्य क्षीरम्..."सप्तच्छदः सप्तपर्णः, ज्योतिष्मती काकमर्दनिका। अधोभागहराणीति विरेचनानीत्यर्थ..."॥ ४ ॥

"...कोशातकी घोषकः, सप्तला स्नुहीभेदः अपरे श्रीफलिकामाहुः, देवदाली स्वनामख्याता, 'देवली' इति लोके। उभयतोभागहराणीति वमनानि विरेचनानि चेत्यर्थः..."॥ ५ ॥

"...अपामार्गः शिखरी 'अन्धडक' इति लोके, शिग्रुः शोभाञ्जनकः, सिद्धार्थः सर्षपः, शिरीषो विषघाती स्वनामख्यातः, करवीरः 'कणवीर' इति लोके, बिम्बी

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कुन्दुरुकः; गिरिकर्णिका सेफन्दः, किणिही कटभी, ज्योतिष्मती ककुन्दनी, अर्कालकौ अर्कद्वयं, शृङ्गवेरं शुण्ठी, तालीशं तालीशपत्रं, तमालं तमालपत्रं, पत्रकमिति लोके, सुरसा 'तुलसी' इति लोके, अर्जकः कुठेरकः, इङ्गुदी इङ्गुकः, मेषशृङ्गी मेढशृङ्गः पुत्रञ्जीवकसदृशपत्रो वृक्षः, अन्ये कर्कटशृङ्गमाहुः, मातुलुङ्गी सुरभिफला वनजाऽरण्यबीजपूरकः, मुरङ्गी रक्तकुसुमः शोभाञ्जनकः, पीलुर्मधुरफलः 'पीलु' इति लोके; जाती मालती; शकृद्रसो गोमयरसः; मूत्रं गोमूत्रम्। शिरोविरेचनानीति नस्यप्रयोगेण शिरस्थं श्लेष्माणं विरेचयन्ति स्रावयन्तीत्यर्थः।....लवणानि पार्थिवविशेषा इति पृथिव्या अवयवविशेषाः, एतेन स्वरूपेणैव लवणानि ग्राह्याणीत्युक्तम्। मद्यान्यासवसंयोगा इति सन्धानकसंयोगो मद्यम्, अत एव तदपि स्वरूपेणैव ग्राह्यम्....॥ ६ ॥

....संशमनानीति सम्यक् शमयतीति संशमनं, सम्यक्त्वं च दुष्टदोषस्यानिर्हरणपूर्वकं शमनम्, अदुष्टस्यानुदीरणं च; व्याधिसंशमनं तु प्रस्तुतव्याधेः संशमनमप्रस्तुतव्याधेरनुदीरणम्। तदुक्तं—"न शोधयति यद्दोषान् समान्नोदीरयत्यपि। समीकरोति च क्रुद्धान् तत् संशमनमुच्यते।".....मेषशृङ्गी मेढशृङ्गः पुत्रञ्जीवकतरुसदृशपत्रो वृक्षः, अन्ये कर्कटशृङ्गमाहुः, बलातिबले शुक्लपीतपुष्पं बलाद्वयं, आर्तगलः ककुभः, केचिदार्तगलं कण्टकीवृक्षमाचक्षते, कच्छुरा कुङ्कुमर्दनिका, 'कच्छुरा शूकशिम्बिः', इत्यन्ये: कुबेराक्षो काष्ठपाटला; पो (पे) टिकेत्यन्ये, वीरतरुर्बिल्वनासिका; शर इत्यन्ये, सहचरः कण्टशेलियाकः, अग्निमन्थः 'अग्निवधूः' इति पूर्वदेशे प्रसिद्ध, वत्सादनी गुडूची, वीर्येण गुडूची वातं हन्ति, रसेन कफपित्ते, अश्मभेदकः पाषाण-भेदकः, वसुकः शिवमल्लिका, बकपुष्पमिति लोके, वशिरः सूर्यावर्तः, अपामार्ग इत्यपरे काञ्चनको धत्तूरकः, 'कर्चूर' इत्यन्ये पठन्ति कर्चूरः शटी, कार्पासी वनकार्पासिका, कार्पासिविटपसदृशी, वृश्चिकाली वृश्चियाकः, पत्तूरः कुचन्दनम्। ....यावद्भूजलानलगुणबहुलं द्रव्यं वातसंशमनमिति ॥ ७ ॥

....चन्दनं श्रीखण्डं, कुचन्दनं रक्तचन्दनं, ह्रीबेरं बालकं, पयस्या क्षीरकाकोली, विदारी विदारीकन्दः, शैवलं शैवालं, कह्लारं रक्तोत्पलं 'बृहत्पत्रिका' इति लोके, अन्ये सौगन्धिकोत्पलं, कुमुदोत्पलं; श्वेतोत्पलं; कन्दली श्वेतश्लक्ष्णबहुपुट कन्दविशेषः 'सर्पच्छत्रकम्' इति लोके, मूर्वा कन्दलीसदृशस्वविटपः 'हधोड' इति लोके... ॥ ८ ॥

....कालेयकेत्यादि। कालेयकः कृष्णवर्णचन्दनविशेषो 'मलयाद्रिचन्दनम्' इति लोके, तिलपर्णी हुलहुलः, शीतशिवं कपूरं, शतपुष्पाभेदमेके, गवेधुकेत्यपरे, सरला त्रिवृत्, प्रकीर्या कण्टकी विटपकरञ्जः, उदकीर्या चिरबिल्वः, इङ्गुदी इङ्गुकः, 'पुत्रञ्जीवक' इत्यन्ये, सुमना जाती, काकादनी हिंस्रा, लाङ्गलकी कलिकारिका, हस्तिकर्णो गजकर्णाकारैकपत्रः, 'भूपलाश' इति लोके, रक्तैरण्ड

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इत्यन्ये मुञ्जातकः, स्वनामख्यातः स्वल्पकन्द उत्तरापथे; लामज्जकमुशीरभेदः···· ॥ ६ ॥

अध्यायः ४०

····वीर्यं शक्तिरुत्पत्तिविशेषः सामर्थ्यं प्रभाव इत्यनर्थान्तरम्। यद्द्रव्यं परिणामकाले स्वाभाविकं रसं परित्यज्य रसान्तरं भजते तत्र 'विपाक' इति संज्ञा···· ॥ २ ॥

····द्रव्यलक्षणमाह—द्रव्यलक्षणमित्यादि। क्रियागुणवदिति क्रियागुणवद्द्रव्यमित्यर्थः क्रिया कर्म, गुणा उक्ता विंशतिः। समवायिकारणमपि द्रव्यमेव; यथा—पटे तन्तवः, घटे मृत्पिण्ड इत्यादि; न च क्रियायां क्रिया समवेता, न गुणेषु गुणाश्च समवेता इति ॥ ३ ॥

····संशमनमिति वमनविरेचनादिकं विना तत्स्थमेव शमयति संशमनं, संशमनभेदा एव सांग्रहिकादयः; पीडनमिति शाल्मलीत्वगादीनां व्रणे कर्मविशेषः; लेखनं पत्तलीकरणं; बृंहणं शरीरवृद्धिकरं; रसायनं वयः स्थापनादिकरणं; वाजीकरणं वाजिवद्येनाप्रतिहतः स्त्रियं याति, अन्ये तु वाजिशब्देन शुक्रमुच्यते, ततोऽवाजिनो वाजिनः क्रियन्ते येनेति वाजीकरणं, शुक्रोत्पादकमित्याहुः, श्वयथुकरविलयनेति करविलयनशब्दौ···· 'श्वयथुहरविलयन' इत्येके पठन्ति; दहनं क्षारादिना; दारणं गृध्रपुरीषादिना; मादनं मत्तताकरणम्, एतच्च मदिरादीनां कर्म; प्राणघ्नत्वं विषादेः; विषप्रशमनत्वमगदादीनां; विषप्रशमनादीनीत्यत्रादिशब्देन व्रणरोपणरोमसञ्जननादयो गृह्यन्ते। स्वबलगुणोत्कर्षादिति स्वबलोत्कर्षात् स्वगुणोत्कर्षाच्चेत्यर्थः। आत्मकर्म कुर्वन्ति वातादिदोषशमनं कोपनं वा कुर्वन्ति अभिभूय निराकरणं कृत्वेत्यर्थः। स्नेहभावाच्चेत्यत्रापि वातं शमयतीति योज्यम्। मधुरश्चेक्षुरस इत्यादि न केवलं वातं शमयतीति वीर्यं रसमभिभूय प्रकोपयत्यपि वातमित्यर्थः। कटुका पिप्पलीत्यादि अत्रार्द्रा पिप्पली यदि गृह्यते तदा तस्याः स्वादुशीतत्वात् कटुकेति विशेषणं युक्तं न स्यात्, अथ शुष्का तदा तस्याः कटूष्णत्वात् पित्तं हन्तीति विशेषणमयुक्तं भवेत; सत्यं, 'तेषु गुर्वी स्वादुशीता पिप्पल्यार्द्रा कफावहा इत्यत्र पाठे शीता चेति चकारो द्रष्टव्यः, तेन न केवलं शीता कटुका चेत्यर्थः, ततो नार्द्रपक्षे दोषः; शुष्कपक्षे तु 'शुष्का कफानिलघ्नी सा वृष्या पित्ताविरोधिनी' इत्यत्र पित्तेन सहेषद्विरोधिनीति व्याख्यानान्न दोषः; केषाञ्चिन्मते 'पित्तप्रकोपणी' इति पाठः; तेषां मते पित्तशमनीयत्व पिप्पल्या वीर्यवादीनां मतं, न पुनः सत्यमेषा पित्तं शमयति; यदि वा आर्द्रा पित्तप्रशमनी शुष्का प्रकोपणीति। अम्लमामलकं लवणं सैन्धवं चेत्यत्रापि मृदुशीतवीर्यत्वात् पित्तं शमयतीति योज्यम्। तिक्ता काकमाचीत्यादि पित्तं

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वर्धयति केवलं न तु प्रकोपयति, तस्यास्त्रिदोषघ्नत्वात् । अन्ये चात्रैवं वदन्ति—वीर्यवादी एवमुष्णवीर्यां काकमाचीं मन्यते, आचार्यस्तु नात्युष्णशीताम्. अत एव त्रिदोषघ्नीत्वं काकमाच्या इति । मधुरा मत्स्याश्चेत्यत्रापि पित्तं वर्धयन्तीति योज्यम् । मूलकं बृहन्मूलकं, न पुनर्बालकं, त्रिदोषघ्नत्वात् ।। ५ ।।

....ये रसा वातशमना मधुराम्ललवणाः ये रसाः, पित्तशमना मधुरतिक्तकषायाः, ये रसा श्लेषमशमनाः कटुतिक्तकषायाः ।। ६-९ ।।

....विशिष्टः पाकोऽविपाकः.... ।। १० ।।

अध्यायः ४१

....व्यवायीति समस्तदेहं व्याप्य पश्चात् पाकं गच्छति विषमद्यवत्...।। (५) ४ ।।

....संशमनमिति न शोधयति यद्दोषान् समानान्नोदीरयत्यपि....।। ६-९ ।।

अध्यायः ४२

....परितोषः परितुष्टिः । प्रह्लादयति सुखमुत्पादयति । तर्पयति तृप्तिं करोति । जीवयति प्राणान् धारयति । उपलेपो मलवृद्धिः । दन्तहर्षो दन्तकुण्ठता । कफप्रसेकः श्लेष्मास्रावः । ...चोष आकर्षणम् हर्षो रोमहर्षः.... ।। ९ ।।

...रोमसंवेजनं रोमाञ्चः... ।। (२) ।।

...पुंस्त्वोपघातः शुक्रक्षयः.... ।। (३) ।।

....शृङ्गाटकं द्विविधं स्थूलाल्पभेदेन; त्रपुसं 'तिरसी' इति लोके; एर्वारुः रोमशा कर्कटी; गिलोड्यः कालङ्कतकः गिलोड्यकन्दः प्रावृड्जातः शणपत्रिकाकारवल्लीयुक्तो 'गिल्लोठी' इति लोके; 'अङ्ग (ङ्क) लोड्य' इत्यन्ये पठन्ति चिच्चो (ञ्चो) टकमिति च व्याख्यानयन्ति, प्रियालश्चारः, पुष्करबीजं पद्मबीजं राजादनः क्षीरिकः, पयस्या विदारीभेदः, क्षीरमोरटः किलाटमस्तु, 'पीलुपर्णी' इत्येके, मधुलिका मर्कटकः । दाडिमेत्यादि प्राचीनामलकः 'पानीयामलक' इति लोके, भव्यफलं 'कर्मरङ्ग' इत्येके 'तालफलसदृशमहावल्कलं कषायाम्लमधुरं' इत्यन्ये, पारावतः कामरूपे मधुराम्लरसफलं, दन्तशठो जम्बीरः शुक्तं सन्धानकविशेषश्चुक्रमिति लोके, सौवीरकतुषोदके निस्तुषतुषसयवकृते त्रिवृत्कषायसहिते सन्धाने, धान्याम्लं काञ्जिकं, प्रभृतिग्रहणाच्छाण्डाक्यादीनामवबोधः सैन्धवेत्यादि पाक्यमुद्भिदं, रोमकं शाकम्भरी देशोत्थं, श्वेतलवणमित्यन्ये, सामुद्रं समुद्रसमीपभवं गुर्जरराष्ट्रे प्रचुरं भवति, पक्त्रिमं पाकाभिनिर्वृत्तं फुल्लालवणम् इत्युच्यते; ऊषरप्रसूतमूषरलवणं,...। शीतशिवं कर्पूरं अवल्गुजफलं बाकुचीबीजं, चण्डा अजमोदाकारा सुगन्धिद्रव्यं, लाङ्गलकी कलिकारिका, शुकनासा

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्योनाकः। ...मण्डूकपर्णी ब्राह्मी, वेत्रकरीरो वेत्राङ्कुरः, स्वादुकण्टको विकङ्कतः 'वृक्षकण्टकारिका' इति प्रसिद्धः, शङ्खिनी यवतिक्ताभेदः, कृतवेधनः कोशातकी, सुमना जाती, अशोकरोहिणी कटुका, वैजयन्ती तर्कारी, सुवर्चला सूर्यावर्तः, वृश्चिकाली वृश्चिकपत्नी, ज्योतिष्मती काकमर्दनिका। ...कतकः तोयप्रसादनफलः, शाकः खरमसृणपत्रपृष्ठोदरः, तयोः फलम्, वनस्पतयो न्यग्रोधादयः,.... कुरुवकः कण्टसेलयाकः, कोविदारः काञ्चनारकः, ...जीवन्ति डोडी, चिल्ली क्षेत्रवास्तुकः, पालङ्क्या शाकविशेषः 'पालङ्क' इति लोके, सुनिषण्णकः सिरिवालिका, 'चतुष्पर्णी' इत्यपरे... ॥ ११ ॥

अध्यायः ४३

...चूर्णप्रकुञ्चं पुनरस्य मध्यमा मात्रा, प्रकुञ्चः पलं, 'मुष्टिः' इत्येके, 'कराङ्गुलिचतुस्कमूलावधिमितं चूर्णम्' इत्यपरे। प्रत्यक्पुष्पा अपामार्गः, सदापुष्पी अर्कस्तस्य मूलं... । शलाटु आमं फलम्। ...रम्यको महानिम्बः। ...फलपिप्पली: मदनफलबीजानि। ...जीवन्ती शुष्कयावनालवर्णा लतौषधी पर्ववती। ...रूपिका अर्कः... ॥ ३ ॥

....जीमूतको देवदाली.... ॥ ४ ॥

....कृतवेधनं कोशातकी.... ॥ ६ ॥

....इक्ष्वाकुः कटुकालाबुः ॥ ७ ॥

अध्यायः ४४

...त्रिवृत् 'निशोथ' इति लोके। ....तिल्वकः स्वल्प रोध्रः। ....सुधा 'सेहुण्ड' इति लोके.... ॥ ३-४ ॥

...इक्षोर्विकारैः खण्डादिभिः; न पुनर्गुडेन, उष्णवीर्यत्वात्तस्य; न च फाणितेन, त्रिदोषकरत्वात्तस्य; नापीक्षुरसेन, विदाहित्वात्तस्येति ॥ ५ ॥

....अरिष्टो निम्बः.... ॥ ६ ॥

...त्रिवर्णं त्रिजातकम्। ...प्रस्थो द्वात्रिंशत्पलानि, द्रवद्रव्यत्वात्। ...कुडवश्चत्वारि पलानि... ॥ ७-८ ॥

...विडङ्गसारो विडङ्गबीजानि। सिन्धूद्भवं सैन्धवं.... ॥ ९-११ ॥

...त्रिभण्डी शुक्ला त्रिवृत्... ॥ १५ ॥

...सिता शर्करा; अजगन्धा जवानिका, 'बोथइका' इत्यन्ये; त्वक्क्षीरी वंशलोचना; विदारी बिडाली (विराली); त्रिवृत् 'निशोत्र' इति लोके। ....क्षौद्रं मधु... । ...श्यामा वृद्धदारुकः, क्षारो यवक्षारः... । ...नीली श्रीफलिका... ॥ १६-२२ ॥

...श्यामा वृद्धादारुकः... ॥ २३ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

…नीली नीलिनी; श्रीफलिकेति लोके। कट्वी कटुरोहिणी… ॥ २६-२७ ॥

…फाणितं काकवी… ॥ २८-३० ॥

…मूर्वा चोरस्नायुः; शाङ्‌र्गेष्टा विटपकरञ्जः, चिरपोटिकेत्यन्ये, अपरे तु काकजङ्घामाहुः। सुधा सेहुण्डः। हैमवती श्वेतवचा… ॥ ३५-३९ ॥

…अजशृङ्गी कर्कटश्रृङ्गी, 'विषाणिका' इत्यपरे… ॥ ४०-४४ ॥

…द्रवन्ती चीरितपत्रा 'संवरी' इति लोके ॥ ४६ ॥

…चतुःस्नेहमिति घृततैलवसामज्जानश्चत्वारः स्नेहाः। शकृत् पुरीषम्… ॥ ४७-४८ ॥

…दन्ती सम्बरी; कनकाह्वयं कङ्गुष्ठं, 'नागकेसरम्' इत्यन्ये; यवासो दुरालभा; विश्वभेषजं शुण्ठी… ॥ ४९-५१ ॥

…नीलिनी श्रीफलिका… ॥ ६२-६९ ॥

चतुरङ्गुलात् किरमालकात्। …सिकतायां वालुकायां… ॥ ७३-७५ ॥

…सौधं सेहुण्डभवम्… ॥ ७८-७९ ॥

…महावृक्षः सेहुण्डः…। …उत्कारिका लप्सिका… ॥ ८०-८३ ॥

…सप्तला सेहुण्डभेदः। शङ्खिनी यवतिक्ता, तस्याः फलं मूलं च विरेचकम्, अन्ये 'शङ्खिनी यवतिक्ताभेदः' इत्याहुः; अपरे तु श्वेतबुध्नामाहुः। दन्ती दन्तिनी। आरग्वधः किरमालकः… ॥ ८४-८५ ॥

…यन्त्रादिपीडितद्रव्यरसः स्वरस उच्यते। यः पिण्डश्चार्द्रपिष्टानां स कल्कः परिकीर्तितः ॥ वह्नौ तु क्वथितं द्रव्यं श्रृतमाहुश्चिकित्सकाः। उपोषितं निशायां तु तोयस्थं शीतमुच्यते ॥ चूर्णमुष्णेन संपृक्तं तत् फाण्टमभिधीयते। अभिभूयाम्बुनोष्णेन क्षणात् पूतमितीतरे' इति। फाण्टलक्षणं तु प्रसङ्गादुक्तम्। कषायो द्विविधः—श्रृतकषायः, शीतकषायश्च। ते तु षट्कल्पा भवन्ति। कल्पा विधयः। अन्ये त्वेवं पठन्ति "चूर्णं कषायः शिशिरः श्रृतश्च तथा च कल्कः स्वरसस्तथैव। पञ्चैव कल्पाः खलु भेषजानां यथोत्तरं ते गुरवः प्रदिष्टाः" इति। ते तु स्वरस एव क्षीरमन्तर्भावयन्ति, फाण्टं शीतकषायेऽन्तर्भावयन्ति ॥ ९१ ॥

अध्यायः ४५

…अनिर्देशरसं अव्यक्तरसमप्रकटरसमित्यर्थः। …अमृतमिति अमृतमित्वेयर्थः, अमृतत्वं पुनरस्य दोषप्रकोपस्याकरणात्; 'अमृतं ब्रह्मरूपम्' इत्यन्ये। जीवनं प्राणधारणं, 'सौम्यधातुवृद्धिकरम्' इति केचित्, 'ओजोवृद्धिकरम्' इत्यन्ये। तर्पणं तृप्तिजनकम्। धारणमिति शस्त्रपातादिव्यथासु मूर्च्छतां शरीरं दधातीति धारणम्। आश्वासजननमिति मार्गादिशुष्कदेहानां प्राणजननम्।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

'''एकान्ततः पथ्यतममिति एकान्ततोऽतिशयेनेत्यर्थः, तर्हि तमप्प्रत्ययः कथं ? उच्यते—स्वार्थिकत्वात्; एतेनातिशयेन पथ्यमित्यर्थः; 'अन्येषामाकाशगुणभुयिष्ठ-भूमिसलिलानां पथ्यानां प्रकृष्टं पथ्यं पथ्यतमम्; एकान्तग्रहणेन सर्वकालदेश-पुरुषव्याधिषु प्रयोगोऽस्य द्योत्यते' इत्येके; 'तमप्प्रत्ययेन स्वस्थस्यातिशयेन हित-मित्यभिहितम् इत्यपरे ॥ ३ ॥

'''अन्ये तु भूतद्रव्यगुणसंयोगं रसविशेषहेतुमाहुः । तथाहि—तत्र स्वलक्षणो-दकभूयिष्ठायां भूमौ मधुरं, पृथिव्यनिलभूयिष्ठायामम्लं, जलाग्निगुणभूयिष्ठायां-लवणं, वाय्वग्निगुणभूयिष्ठायां कटुकं, पृथिव्यनिलगुणभूयिष्ठायां कषायम्, आकाश-गुणभूयिष्ठायामव्यक्तरसम्' इति ॥ ६ ॥

'''धाराभिः पततीति धारम् । करा वर्षोपलाः, तेषां तोयं कारम् । तौषारम् अवश्यायजं निशाजलम् । तदेव संहतावयवत्वेन स्फटिकशिलाशकल-सदृशावयवं हिमं, तद्भवं हैमम् । '''अविदग्धं अविवर्णम्''' ॥ ७ ॥

'''शैवालं शैवलं; हठः जलकुम्भिका, अभूमिलग्नमूलस्तृणविशेषः इत्येके । '''विष्टम्भो गुड्गुडाशब्दः''' ॥ ११ ॥

'''चम्पको राजचम्पकः, उत्पलं सौगन्धिकं''' ॥ १२ ॥

'''कतकं शशकपुरीषप्रतिमं फलं; गोमेदकः पुष्परागाभो मणिः; मत्कोल-मिति केचित्; बिसग्रन्थिः पद्ममूलं ''''मुक्ता मौक्तिकं, मणिः स्फटिकादिः''' ॥ १७ ॥

'''पौरुषेया वृष्या इत्यर्थ''' ॥ २३ ॥

'''बल्यमुपचयोजः शक्तिकरत्वात् । विशिष्टरसाद्युत्पादनाद्रसायनं स्वस्था-तुरोपयोगि । मेध्यं पवित्रम्''' ॥ २६ ॥

'''ह्लादि सुखावहम्'''' ॥ २७ ॥

'''अविदाहि अदाहकारीत्यर्थः ॥ ३७-३८ ॥

'''ओषधिशब्देन सर्वद्रव्याणि न तु फलपाकावसानाः''' । प्राणदमग्नि-सोमादिधारणादुपचयादिकरणाद्वा''' ॥ ४८ ॥

'''बल्यं मांसोपचयकरम्, अन्ये ओजसो वर्धनमिति, तन्मते ओजसो वर्धनम् इति पाठोऽग्रे न भवति । वृष्यं शुक्रजनकं, वाजीकरणं शुक्रप्रवर्तनम् । ''''मेध्यं मेधाजनकं पवित्रं वा । '''आयुष्यं आयुषे हितम्''' ॥ ४९ ॥

'''अतो द्वयमेव क्षीरपथ्यापथ्यविभागे हेतुर्जातिविशेषो भ्रमणादिविशेषश्च । सर्वव्याधिहरं सर्वदोषहरम् ॥ ५१-५२ ॥

'''स्थैर्यकरं शरीरदार्ढ्यकरम्, अन्ये 'तारुण्यस्थापकम्' इत्याहुः ॥ ५८ ॥

''''विष्टम्भो गुडगुडाशब्दः ॥ ५९ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

"...श्रृतं पक्वम्; आवर्तितमित्यर्थः..." ॥ ६२ ॥

"...बृंहणं देहवृद्धिकरम् ॥ ६३ ॥

"...वाडवमाश्वम् ॥ ७२ ॥

...सरः दध्न उपरितनो भागः स्नेहबहुलः 'तर' इति प्रसिद्धः। वह्नेर्विधमनः अग्निनाशनः। वृष्यः शुक्रवर्धन इति चोभयमतिवृद्धिकरत्वप्राप्त्ये; एतेन जनकप्रवर्तकमुक्तम् ॥ ७८ ॥

"...विष्टम्भीति सवाततोदशूला मलस्याप्रवृत्तिर्विष्टम्भः, अन्ये 'विष्टम्भो गुडगुडाशब्दः' इति प्राहुः ॥ ७६ ॥

"...अवृष्यम् अशुक्रलम्'... ॥ ८४ ॥

"...विनष्टं तक्रं धनावयवं तक्रकूर्चिका—

"...मण्डो मस्तुकः; कूर्चिकाभूतं यद्दधि तक्रं च ताभ्यां जातो यो मण्डः स तक्राल्लघुतरः, प्राक्तदधिजातं पुनर्मस्तु लाघवात्तक्रसममेव। अन्ये त्वेवं पठन्ति 'दधिकूर्चिकतक्रजः' इति... मस्तुत्रयसंग्रहः। 'तक्रतुल्यो दधिमण्डो विष्टम्भारुचिनाशन' इति च क्वचित् पठ्यते। प्राक्तमस्तु च ग्रीष्मादिविदाहेन सुजातस्य दध्नोऽच्छो भाग उच्यते ॥ ६० ॥

"...कूर्चिकीभूतक्षीरस्य घनभागः किलाटः; यं लोकाः क्षीरांशुमित्याहुः; सूदास्तु 'किलाटी' इति। पुंस्त्वं शुक्रम्—

"...पीयूषः सद्यः प्रसूताया गोः क्षीरं सप्ताहं यावत्, तदेव सप्ताहात् परतो यावत् प्रसन्नतां न गच्छति तावत् 'मोरट' इत्युच्यते। जेज्जटस्तु 'विनष्टक्षीरभवं मस्तु मोरटम्; इत्याह ॥ ६१ ॥

.... बलकरमोजस्करम्। बृंहणं देहोपचयकरम् ... ॥ ६२ ॥

.... संतानिका क्षीरस्योपरिस्त्यानो भागः क्षीरसर इत्यर्थः। तर्पणी तृप्तिजनिका ॥ ६४ ॥

"...अनभिष्यन्दीति अत्रेषदर्थे नञ्; तेन, अल्पाभिष्यन्दीत्यर्थः; एतेन दोषधातुमलस्रोतसां मन्दक्लेदप्राप्तिजननम्। स्नेहनं स्निग्धत्वापादकम्।... मेध्यं पवित्रम्। वयः स्थापनमिति यावदेवायुः प्रमितं तावदेवायुः स्थापयत्यनाबाधम्।... रक्षोघ्नं राक्षसभयहरम् ॥ ६६ ॥

...सर्पिर्मण्डस्त्वित्यादि। विलीनघृतस्य घनीभूत उपरितनो भागो मण्डः ॥ १०६ ॥

...तिलेषु भवं तैलं तिलतैलम्। "...बृंहणं धातुपुष्टिकरत्वेन शरीरदार्ढ्यावहत्वात्; न च लेखनत्वमप्यस्य विरुद्धं, मेदोहरत्वात्। न खलु तैलं मेदोघ्नमपि

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मांसं न करोति, प्रतिनियतशक्तित्वाद्द्रव्याणाम्। प्रीणनं तृप्तिजनकम्। व्यवायि अपरिणतमेव व्याप्य देहं पच्यते। सूक्ष्मं सूक्ष्मस्रोतोनुसारि। विशदं निर्मलम्। विकासि सन्धिबन्धविमोचकम्। वृष्यं शुक्रलम्, अन्ये तु धातुपोषणकरणाद्वृष्यं सद्यः पुनरवृष्यमेव ॱॱ' ॥ ११२-११३ ॥

ॱॱॱ अधोभागदोषहरं विरेचनेन दोषहरमित्यर्थः ॥ ११४ ॥

ॱॱ'जीमूतको देवदाली, वृक्षकः कुटजः, कृतवेधनः कोशातकी, अर्कः प्रसिद्धः, कम्पिल्लको रेचनिकः, हस्तिकर्णो महापर्णो 'भूपलाश' इत्युच्यते, अन्ये रक्तैरण्डमाहुः, पृथ्वीका कृष्णजीरकः, पीलुः प्रसिद्धः, करञ्जो वृक्षकरञ्जः, इङ्गुदी कण्टकी (क) वृक्षः प्रसिद्धः, अन्ये पुत्रजीवकमाहुः शिग्रुः शोभाञ्जनफलं, सुवर्चला सूर्यावर्तः, विडङ्गः कृमिहा, ज्योतीष्मती काकमर्दनिका ॱॱॱ ॥ ११५ ॥

ॱॱॱ अतिमुक्तक आवन्तकः, कोलो बदरमज्जा, अक्षोड उत्तरापथे प्रसिद्धः; जीवन्ती स्वर्णजीवन्तीफलं, प्रियालः प्रसिद्धो मधुराम्लफलः, कर्बुदारः काञ्चनारः, सूर्यवल्ली अर्कपुष्पी, 'सूर्यावर्तभेदः' इत्यन्ये, सुवर्चलायाः पूर्वमेव पठितत्वात्, त्रपुसं कर्कटीफलं 'त्रिषुडी' इति लोके, एर्वारुर्ग्रीष्मकर्कटिका, कर्कारु वाडवं त्रपुसम्।ॱॱॱॱ अग्निसादनानि अग्निमान्द्यकराणि ॱॱॱॱ ॥ १२० ॥

ॱॱॱ पलाशः किंशुकः ॥ १२१ ॥

ॱॱॱॱ तुवरकं पश्चिमार्णवतीरजातमाहुः। तदुक्तं, —"पत्रैस्तु केशराकारैः कपित्थसदृशैः फलैः। वृक्षस्तुवरको नाम पश्चिमार्णवतीरजः"—इति। उभयतोभागदोषहरे चेति वमनेन विरेचनेन चेत्यर्थः ॥ १२२ ॥

ॱॱॱ गण्डीरः सारप्रधानस्तरुविशेषःॱॱॱॱ॥ १२३ ॥

ॱॱॱ तुम्बी तिक्तालाबुः, कोशाम्रः 'कोशम्ब' इति प्रसिद्धः, दन्ती दन्तिनी, द्रवन्ती शम्बरी, श्यामा वृद्धदारुकः, सप्तला सातलेति प्रसिद्धा, नीलिनी श्रीफलिका,ॱॱॱॱशङ्खिनी श्वेतश्रीफलिका, अन्ये यवतिक्ताभेदमाहुः। अधोभागदोषहरा इति विरचनेनॱॱॱॱ॥ १२४ ॥

ॱॱॱ यवतिक्ता यवक्षेत्रेषु जायते तिक्तसप्ताष्टपत्रा 'यवेन्तिका' इति प्रसिद्धा ॥ १२५ ॥

ॱॱॱएकैषिका अविद्धकरणी 'पाठा' इति लोके, त्रिवृदिति जेज्झटः ॥ १२६ ॥

ॱॱॱ सहकारतलमाम्रतैलम्। तच्च 'आम्रस्य तरुणफलवृन्तभङ्गमात्रत एव जातम्' इति गयी, 'तत्फलमज्जस्नेहः' इत्यन्ये ॥ १२७ ॥

ॱॱॱॱ सुकुमारं सौकुमार्यकरम्। लेखनं पत्तलीकरणम्। हृद्यं हृदयप्रियं हितं

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

च। वाजीकरणं शुक्रलम्। .... चक्षुष्यं चक्षुषे हितम्।.... आह्लादि सुखकारि। .... ॥ १३२ ॥

.... पिङ्गला महत्यो मक्षिकाः पुत्तिकाः, तद्भवं पौत्तिकम्, अन्ये 'मशकोपमा मक्षिकाः कृष्णवर्णाः पुत्तिकाः' इति वदन्ति। भ्रमराः प्रसिद्धाः, तद्भवं भ्रामरम्। मक्षिकाः पिङ्गला एव स्वल्पाः क्षुद्राः, तद्भवं क्षौद्रम्। पिङ्गलवर्णा महत्यो मक्षिकास्तद्भवं माक्षिकम्, अन्ये 'अत्यल्पा मक्षिकाः' 'इत्याहुः। पीणकपिङ्गला 'बग' इति लोके यत् कुर्वन्ति छत्रकाकारं हैमवते वने मालववने च तच्छात्रम्। 'मधूकवृक्षपुष्पेभ्यो जरत्कार्वाश्रमोद्भवाः। स्रवन्त्यार्घ्यं मधुप्राहुः श्वेतकं मालवे जनाः॥ तीक्ष्णतुण्डास्तु याः पीतवर्णाः षट्पदसन्निभाः। अर्घा नाम च तद्भूतमार्घ्यमित्यपरे जगुः, इति। ....उद्दालकाः कपिलकीटाः स्वल्पाः प्रायशो वल्मीकेष्वन्तर्मधु चिन्वन्ति, तद्भवमौद्दालकम्। दालमिति दलं पत्रं तदुपरिस्थितं दालम्, अन्ये तु कपिला एव स्वल्पतरा मक्षिकाः प्रायेण वृक्षकोटरोद्भवा 'दला' इत्युच्यन्ते, तद्भवं दालमिति ॥ १३३ ॥

....योगैरिति औषधसमूहैरित्यर्थः .... ॥ १४२ ॥

....गुरुत्वं चिरपाकित्वम्। विदाहीति "द्रव्यस्वभावादथ गौरवाद्वा चिरेण पाकं जठराग्नियोगात्। पित्तप्रकोपं विदहत् करोति तदन्नपानं कथितं विदाहि" इति। विष्टम्भो गुडगुडाशब्दः, अन्ये तु सवाततोदशूला मलस्या-प्रवृत्तिर्विष्टम्भः ....॥ १५८ ॥

....फाणितमित्यादि। फाणितं क्षुद्रगुडः 'काकवी' 'लहकाकर' वा इति लोके। अस्य त्रिदोषकरत्वं प्रभावात् ॥ १५९ ॥

....मत्स्यण्डिका द्रवखण्डः 'खण्डद्रव' इति लोके, खण्डः प्रसिद्धः, शर्करा सितोपला 'तवराज' इति लोके। गुडान्मत्स्यण्डिका ततः खण्डस्ततः शर्करेति वैमल्योत्कर्षे शैत्यादिप्रकर्षं इत्यर्थः ॥ १६२ ॥

....गौरवं वातपित्तहारित्वं, गौरवं मधुरविपाकित्वमित्यन्ये .... ॥ १६३ ॥

...मधुशर्करेत्यादि। पाकात् कालान्तरशोषणाद्वा घनीभूतावयवं मधु शर्करातुल्यत्वात् 'मधुशर्करा' इत्युच्यते। छेदनी कफादीनां पिण्डीभूतानां मेदका-रिणी ॥ १६६ ॥

....यवासक्वाथपाकघनीभावाच्छर्करा कृता यवासशर्करा ॥ १६७ ॥

....इन्द्रियबोधनम् इन्द्रियपाटवकरम्। विकासि सन्धिबन्धविमोचकम्। सृष्टविण्मूत्रप्रवर्तकम् ॥ १७० ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

···मार्द्वीकं द्राक्षोद्भवम् ··· ॥ १७१-१७३ ॥

····कर्शनं कार्श्यकरम् ॥ १७४ ॥

···सुरा लोहितवर्णा पिष्टकिण्वकल्केन किञ्चित्कलुषा···· ॥ १७५ ॥

···श्वेतसुरा श्वेतपुनर्नवादिमूलशालिपिष्टककिण्वप्रभवा 'कतोली' इति प्रसिद्धा ॥ १७६ ॥

···प्रसन्ना सुराया मण्ड उपर्यच्छो भागः ··· ॥ १७७ ॥

····मधूलकः स्वल्पगोधूमो मध्यदेशे 'पीशीका' इति ख्यातः; मर्कटहस्ततृणं वा, तत्फलकिण्वं मधूलकम्; 'असंजातमद्यं मधूकपुष्पोत्थम्' इति जेज्झटः ॥ १७८ ॥

···अक्षस्य बिभीतकस्य वल्कलैः सह कृता आक्षिकी; 'वल्किकी' इति केचित् ···· ॥ १७९ ॥

····यवसक्तुकृतः कोहलः 'कौहलिका' इति लोके; अन्ये पुनर्भवतसुरामाहुः यामेव पौण्ड्राः 'काञ्चनाली' इत्याहुः ॥—

····जगलोऽधः किट्टं मद्यस्य यो बहिस्त्यज्यते। अन्ये 'किण्वभक्तसुरा जगलमित्युच्यते'····॥ १८० ॥

····बक्कसो जगल एवाद्रवः किण्वौषधामान्नम् ॥ १८१ ॥

····शीधुः सस्यक इक्षुरसेन क्वथितेन धातक्यादिबद्धपाशः कालान्तरेण निष्पन्नः किञ्चिद्गुडघृतावापः सस्यकवाच्यः ॥ १८२ ॥

····इन्द्रियबोधनः इन्द्रियपाटवजनकः ॥ १८३ ॥

····आक्षिक इत्यादि। बिभीतकक्वाथगुडकृतो धातकीकुसुमादिकृतसंस्कारः शीधुराक्षिकः। द्रव्यप्रभावादपरमद्यापेक्षया प्रायशः पाण्डुरोगे व्रणे चाविरुद्धः; ग्राहित्वमप्येवं वाच्यम् ॥ १८६ ॥

····जम्बूफलरसतुम्बरुक्वाथगुडधातक्यादिकृतसंस्कारो जाम्बवः शीधुरुक्तः। बद्धनिस्यन्दो बद्धमूत्रः। तुवरः कषायः ॥

····सुरासवः सुरया सूयते तोयकार्यं क्रियते यस्मिन् सः सुरासवः···॥ १८७ ॥

···मध्वासवो मधुगुडाभ्यां सन्धानम् ॥ १८८ ॥

···तत्र मैरेयो नाम सुरासवयोः प्रत्येकनिष्पादितयोरेकीकृत्य पुनः संधानान्मैरेयः। सुरा पैष्टी, आसवश्च गुडयोनिः, मधु च देयमिति त्रियोनित्वम्। यदि वा पैष्टी मध्वासवो गुडश्चेति सन्धानात्त्रियोनित्वेन मैरेयो द्विविधो भवति ॥ १८९ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

•••अत्र मधूकपुष्पोत्थे केचिद्गुडं नेच्छन्ति; शीधुत्वाद्गुडमिच्छन्त्यन्ये ॥ १६१ ॥

••••पुराणत्वं ज्ञातरसप्रसादनत्वेन गन्धादिसंपत्या; 'अतीतसम्वत्सरं जीर्णम्' इत्यन्ये वदन्ति ॥ १६३ ॥

••••द्रव्यसंयोग: अभयाचित्रकादिसंयोग: । संस्काराच्च मद्यादधिककर्मता•••• ॥ १६४-१६५ ॥

••••शीधुशब्देनात्र मद्यमाहु: । द्रव्यप्रधानमरिष्टं, द्रवप्रधान आसव:; उभयप्रधानं मद्यम् ••••॥ १६७ ॥

••••विदाहि "जठराग्निसंयोगाद्य: पाकमगच्छन् मध्यमायामेव पाकावस्थायां विदह्यमान: पित्तं कुर्वंश्चिरकालमवतिष्ठते न शीघ्रं जरां याति गुरुत्वाद्वस्तुस्वभावाद्वा स विदाहयुक्तो भावो भण्यते" इत्यागमिका:, अन्ये 'विदाहि विविधसन्तापकारि' इत्याहु: ।••••गुरु चिरपाकि । अहृद्यम् अप्रियम् ।••••तीक्ष्णं मुखे दु:खोत्पादकम् ।••••पिच्छिलं श्लेष्मस्पर्शवत्••••॥ १६८-२०२ ॥

••••मदावहं हर्षकारि••••॥ २०३ ॥

••••विकासि सन्धिबन्धविमोचनकारि••••॥ २०४-२०५ ॥

••••शुक्तं चुक्रमुच्यते, यदुक्तं—"यन्मस्त्वादि शुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम् । धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते" इति, तच्चेक्षुरसमधूकपुष्पपीलुप्रभृतिभि: कषायव्यतिरेकेणासूयते, कन्दाद्यासुतमपि शुक्तमाहुरन्ये । छेदनं कफग्रन्थ्यादीनाम् ।••••जरणमामस्य••••॥ २१० ॥

••••गौडानि गुडोद्भवानि; "गुडाम्बुना सतैलेन सन्धानं काञ्जिकं तु यत् । कन्दशाकफलैर्युक्तं गुडशुक्तं तदुच्यते"—इति । रसशुक्तानि इक्षुरसादिकृतानि । गुडशुक्तवदिक्षुरसशुक्तं सन्धेयम् । मधुशुक्तं तु "जम्बीरस्य फलरसं पिप्पलीमूलसंयुतम् । मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत् ॥ त्र्यहेण तज्जातरसं मधुशुक्तमुदाहृतम्"—इति (मधुभाण्डे इति मधुपूर्णप्राये भाण्डे इत्यर्थ: अथवा मधूनि कृत्वा भाण्डे निक्षिप्येति योज्यम्) । मद्यशुक्तमिति पाठान्तरं; तत्र मद्यशुक्तलक्षणमुच्यते—"सर्वं मद्यं पञ्चरसं कालान्तरवशाद्यदा । त्यक्त्वाऽन्यरसमम्लत्वं याति शुक्तं तदुच्यते" इति •• ॥ २१२ ॥

••••तुषाम्ब्वित्यादि । काञ्जिकभेदावेतौ । तुषाम्बुसौवीरके विरेचनाध्यायोक्ते अपि सन्धानसामान्यादधिकगुणकर्मदर्शनायेहोक्ते ॥ २१३ ॥

••••धान्याम्लमित्यादि । धान्याम्लं काञ्जिकं शालिचूर्णाद्यवकोद्रवादिकृतं

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मद्यम्। जीवनं प्राणधारणं शाल्यादिकृतत्वात्। दाहनाशनं स्पर्शात्।""जरणं पाचनम्"" ॥ २१४-२१६॥

"'गोमूत्रं गोरेव न तु वृषभस्य, महिषीसाहचर्यात्, न हि तत्र महिषेति पाठः; अथवा वृद्धव्यवहारादित्येके; आचार्यास्तु गोमहिष्यजीवानां स्त्रीणां, गजहयखरोष्ट्रमानुषाणां पुनः पुंसाम्, अनुक्तव्यक्तिके तु मूत्रपाठे उभयोरपि मूत्राणि ग्राह्याणि, यत्र तु व्यक्त्या स्त्रीपुरुषनिर्देशस्तत्र तस्यैवेति निर्णीतवन्तः ॥ २२०-२२१॥

""मानुषमित्यादि। कारभं मानुषं च मूत्रं विषापहमित्यर्थः। मानुषमष्टानां मूत्राणां मध्येऽनुद्दिष्टमपि 'तत् सर्वम्' इत्यनेनैव पूर्वोक्तेन सूचितत्वाद्विवृतम् ॥ २२८॥

अध्यायः ४६

""अशितं भोज्यमोदनादि, पीतं पेयं क्षीरादि, लीढं लेह्यं मध्वादि, खादितं भक्ष्यं मोदकादि"" ॥ ३॥

"'लोहितशाली रक्तशालिः; कलमोऽन्तर्वेद्यां 'कलविः' इति लोके; कर्दमक इति सातिशये पङ्के निष्पद्यत इति कर्दमको लोकतोऽवगन्तव्यः; पाण्डुक इति पाण्डुतुषः पाण्डुशूकश्च पाण्डुकः; सुगन्धको देवशालिः पाञ्चाले; शकुनाहृत उत्तरकुरोः सकाशाद्धंसैरानीतः, अवन्त्यां नगर्यां स एव वक्रनाम्ना प्रसिद्धः; मगधदेशे तु 'पाशक' इति, वृद्धवैद्यास्तु "द्वीपान्तरात् समानीतो गरुडेन महात्मना। शकुनाहृतः स शालिः स्याद्गरुडापरनामकः" इत्याहुः, पुष्पाणीव सुगन्धानि सुकुमाराण्यमण्डानि तण्डुलानि यस्य सः पुष्पाण्डको लोकतोऽवगन्तव्यः पुण्डरीकं श्वेतपद्मं तत्सदृशः सौकुमार्यवर्णसौरभैर्यः सः पुण्डरीको देवग्रहादेव बहुपोषनामा; महातण्डुलको महाशालिः; शीतादिभ्भेतीत्येत्रं शीतभीरुको लोकादवगन्तव्यः रोध्रपुष्पाकाराः शूका यस्य स रोध्रपुष्पकः; दीर्घाः शूका यस्य स दीर्घशूकः; काञ्चनकः स्वर्णशालिः; महिषशूको मध्यदेशे 'तिलवासी' इति प्रसिद्धः; हायनकः 'शङ्गुवाक' इति लोके, जेज्झटस्तु 'घोटकपुच्छ' इत्याह, दूषकमहादूषको लोकादवगन्तव्यः। प्रभृतिग्रहणाद्यवकनैषधादयः। शालय इति अकण्डितशुक्ला हैमन्ताः अन्ये तु कण्डितशुक्ला अकण्डितशुक्लाश्च हैमन्ताः शालयः ग्रैष्माः षष्टिकाः; 'प्रायेण गर्भपाकाः षष्टिकाः' इत्यन्ये; वार्षिकास्तु व्रीहयः, 'कण्डितशुक्लास्तु व्रीहयः' इत्यन्ये"" ॥ ४॥

""षष्टिको गौरषष्टिकः, मुकुन्दककाकलकासनपुष्पककुरवककेदाराः कृष्णषष्टिकाः, शेषा गौरकृष्णा इति। प्रभृतिग्रहणाच्चीनदुर्दरशारदादयः। षष्टिको

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

व्रीहिभेद एव, 'षष्टिको व्रीहिषु श्रेष्ठ' इत्युक्तत्वात्; किंतु व्रीहिश्चिरपाकी, षष्टिकस्तु शीघ्रपाकी ॥ ८-९ ॥

....स्थैर्यकृत् देहदार्ढ्यकृत् तारुण्यस्थापको वा ॥ १० ॥

....कृष्णव्रीहिः कृष्णतुषतण्डुलः; शालामुखः कृष्णशुक्लाकारतण्डुलः, जतु लाक्षा तदाकृति मुखं यस्यासौ जतुमुखः, नन्दीमुखः आडीचञ्चुसदृशमुखतण्डुलः, लावाक्षिसदृशतण्डुलो लावाक्षः, षष्टिकवत्त्वरितं पच्यत इति त्वरितकः; कुक्कुटाण्डानीव वर्णेन वर्तुलतया च तण्डुला यस्य सः कुक्कुटाण्डकः, पारावतवच्छुक्लतण्डुलः पारावतः, पाटलापुष्पवर्णव्रीहिः पाटलः'...॥ १२ ॥

...वृष्याः शुक्रवैरेचनिकाः। शुक्रलाः शुक्रवृद्धिकराः ॥ १७ ॥

....मूत्रविवर्धना इति अदाहित्वात्, 'मूत्रला' इत्येके, अन्ये तु 'मूत्रविवर्धना मूत्रापकर्षणाः प्रमेहिणां हिता इत्यर्थः' ॥ १८ ॥

...कुधान्येति कुत्सितानि कुधान्यानि ॥ २० ॥

....कोरदूषकः कोद्रवः; श्यामाकस्त्रिविधः—श्यामाकः, उष्ट्रश्यामाकः, हस्तिश्यामाकश्चेतिः; श्यामाकशब्देन तोयश्यामाक उच्यते, उष्ट्रश्यामाकः स्थूलश्यामाकः, हस्तिश्यामाकः श्यामिकेति लोके; नीवार उलिकाधान्यं, तद्विविधम्—एकं धान्यसदृशविटपं धान्यक्षेत्रजं, द्वितीयं महादलकाण्डं तु सलिलजं; तत्र सलिलजं सलिलवृद्धिमात्रस्तम्बप्ररोहं रक्तशूकं च, तदेव 'प्रशान्तिका' इति तन्त्रान्तरेऽपि पठ्यते; वरको वरटिका शाकम्भरीभूमौ प्रायशः; उद्दालको वनकोद्रवः; प्रियङ्गुः 'कङ्गुनिका' इति लोके; मधूलिका मर्कटहस्ततृणं; तद्भेदो नन्दीमुखी; कुरुविन्दको व्रीहिगुरुः; गवेधुकस्तृणविशेषः; 'गलगोधूम' इति लोके, देशान्तरे तु 'गरल' इति लोके, अन्ये तु प्रभृतिग्रहणाद्गवेधुकशब्दं गृह्णन्ति; सरः सरकर्णिका बरुकः 'बरु' इति लोके, अन्ये तु बरुकशब्दं प्रभृतिग्रहणाद्गृहणन्ति...मुकुन्दो मुलुन्दः; वेणुयवो वंशफलम्। शेषाणि तु वनचारिभ्यो ज्ञेयानि। प्रभृतिग्रहणेन झण्टीघर्मूटीजोन्नलिकादयः ॥ २१ ॥

...मुद्गा नानाविधा हरितपीतकृष्णरक्तभेदेन; वनमुद्गस्तु वने जायते कृष्णमुद्ग इति प्रसिद्धः; 'मुद्गिका' इति लोके; कलायास्त्रिपुटाः; मकुष्ठको मोठः; मसूरा द्विविधाः—कृष्णाः पाण्डुराश्च, तत्र कृष्णवर्णा मसूराभिधानाः पाण्डुवर्णा मङ्गल्याकाभिधानाः; चणकः प्रसिद्धः; सतीनो वर्तुलकः; स्वल्पास्त्रिपुटाः; हरेणुः स्वल्पवर्तुलः; आढकी तुवरी। वैदला इति एषां 'वैदला' इति सञ्ज्ञा, न पुनरन्वयार्थेन वैदलसंज्ञा, एवं हि विदलानामिति वैदला इति माषकुलत्थादिष्वपि वैदलत्वं स्याद्'... ॥ २७ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

...सन्तर्पणस्तृप्तिकरः । बलप्रदः बलमुपचयशक्तिलक्षणम् । वृष्यत्वशुक्रलत्वे स्रुतिवृद्धिकरत्वेन... ॥ ३४ ॥

...अलसान्द्रो राजमाषः । कषायरसप्रभावात् कफहारित्वमवृष्यत्वं च ज्ञेयम्.... ॥ ३५ ॥

...आत्मगुप्ता कपिकच्छुः; तस्याः फलमात्मगुप्तम् । काकाण्डफलमश्वकः; कपिकच्छुसदृशशिम्बः काकाण्डः 'शूकरशिम्बी' इति लोके....॥ ३५ ॥

...आरण्यमाषाणां रुक्षत्वाविदाहित्वे स्वजात्यपेक्षया ॥ ३६ ॥

...दन्तेभ्यो हितो दन्त्यः । त्वचे हितस्त्वच्यः । केशेभ्यो हितः केश्यः ॥ ३९ ॥

...स्थैर्यं वयःस्थापनकारित्वम्... ॥ ४१-४२ ॥

...अतियवा निःशूकाः कृष्णारुणयवा एव...। ...स्थिरो वयः स्थापनकारी ....॥ ४३ ॥

...सिद्धार्थकः श्वेतसर्षपः ।....असितसर्षपो रक्तसर्षपः ॥ ४८-४९ ॥

...नवमिति वर्षं यावत् । अभिष्यन्दि दोषधातुमलस्रोतसां क्लेदप्राप्तिजननम्....। ...विरूढम् अङ्कुरजननशक्तिरहितमित्यर्थः, अन्ये 'विरूढमङ्कुरितम्' इत्याहुः, ईषद्भृष्टं चणकमुद्रादिविरूढमाहुरपरे ॥ ५१ ॥

...जलेशयाः कोशस्थाः पादिनो मत्स्याश्च; आनूपाः कूलचराः प्लवाश्च; ग्राम्यशब्देनैकशफशब्देन च ग्राम्याः, शफः खुरः; क्रव्यभुक्शब्देन च गुहाशयाः प्रसहाश्च, क्रव्यं मांसं; जाङ्गलशब्देन जङ्घालविष्किरप्रतुदपर्णमृगबिलेशया इति त्रयोदश भेदाः षट्स्वेवान्तर्भूताः...॥ ५३ ॥

....एणः कृष्णहरिणः, हरिणो गौरहरिणः, ऋक्षो नीलाण्डः 'रोरु' इति प्रसिद्धः, कुरङ्गश्चतुरगतिः 'चतुरङ्ग' इति लोके, करालोऽधोनिष्क्रान्तदन्तो हिमवदादिपर्वतेषु 'कस्तूरीमृग' इति लोके, कृतमाला बहवः सङ्घातचारिणो मृगा देशान्तरे लोकादवगन्तव्याः, शरभोऽष्टापद उष्ट्रप्रमाणो महाशृङ्गः पृष्ठगतचतुष्पादः काश्मीरे प्रसिद्धः, श्वदंष्ट्रश्चतुर्दंष्ट्रोऽतिदुष्टः 'कर्कटक' इति कार्तिकपुरे, पृषतो बिन्दुचित्रितः 'चित्तल' इति लोके, चारुष्कश्चारुशरीरः स्वल्पतनुर्मृगभेद एव, मृगामातृका अल्पा पृथूदरा चतुरङ्गस्त्री 'भेदली' इति लोके... ॥ ५४ ॥

...तित्तिरिः कृष्णतित्तिरिश्चित्रपक्षः; कपिञ्जलो गौरतित्तिरिः; वर्तीरः कपिञ्जलानूकः कपिञ्जलादल्पो वर्तिकातः किञ्चिन्महान् वर्तिकासदृश एव, 'घर्घरा' इति लोके; वर्तिकावर्तिकौ तद्भेदौ; नप्तृका लोके घुडुरुकाभिधा हूङ्कारकारिण्यल्पा पाण्डुरोदरा; वार्तीका वर्तिचटकाः स्वल्पाः संघातचारिणः 'वगेडा' इति

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लोके; चकोरो रक्ताक्षो विषसूचकः स्वनाम्ना ख्यातः; कलविङ्कः कालचटको भृङ्गराजाद्भिन्नः, अपरे भृङ्गराजमाहुः, अन्ये तु रक्तशिरसं कृष्णग्रीवं ग्रामचटकाकारं कलविङ्कमाहुः; मयूरः प्रसिद्धः; क्रकरो लावान्तको कपिञ्जलात् स्थूलः, 'कयर' इति लोके; उपचक्रः क्रकरभेदः कृशचञ्चुर्मदाविलः; कुक्कुटः प्रसिद्धः; सारङ्गश्चातकः; अन्ये कृष्णकर्बुरश्चातकाकारो विष्किरः; शतपत्रो दार्वाघाटः, 'काष्ठकुट्टक' इति लोके; कुतित्तिरिस्तित्तिरिभेदः पाण्डुः कपिलः; कुरुवाहकः कुरुकुरुकः; यवालको यवगुड्डुरुकः। प्रभृतिग्रहणेनैवंजातीयाः विकीर्य भक्षयन्तीति विष्किराः; त्रिभिश्चरणयुगलचञ्चुभिराहलन्ति विलिखन्तीति व्याहलाः… ॥ ५६ ॥

…कपोतो वनवासी 'पाण्डुक' इति लोके, स च नानाविधः, पारावतो गृहदेवकुलालयः; भृङ्गराजो भ्रमरको धूम्याटसदृशः 'पक्षिराज' इति लोके; परभृतः कोकिलः; कोयष्टिः कोयङ्गका दीर्घजङ्घा 'कोयङ्ग' इति लोके; कुलिङ्गो वन्यचटको ग्राम्यचटकाकारः; गृहकुलिङ्गः पुण्ड्रचटकः 'ग्रामचटक' इति लोके; गोक्ष्वेडो गोनर्दः; डिण्डिमाणवकः डिण्डिमोत्कटध्वनिः; शतपत्रो राजशूकः; मातृनिन्दकः प्रियात्मकः 'पुत्ररञ्जक' इति लोके; भेदाशी पुत्रशुकः, भेकाशीति केचित्, तत्रापि स एवार्थः; शुकसारिके प्रसिद्धः वल्गुली 'गदुलिका' इति लोके; गिरिशा गिरिवर्तिका, 'पर्वतवाही' इत्येके; लट्वा फेञ्जातको रक्तपुच्छाधोभागः, अन्ये भरद्वाजभेदमाहुः, 'लाट' इति लोके; लट्टूषको द्वितीयफेञ्जातकः, अन्ये सश्वानचञ्च्वाकृतिचञ्चुभागं दीर्घपुच्छादिलक्षणेन प्रतुदं विहङ्गमाहुः; सुगृहा पीतमस्तका 'वया' इति लोके; खञ्जरीटः सितासितवर्णो द्रुतललितगतिः 'कवडिया' इति लोके; हारीतो हरितपीतवर्णः 'हरिताल' इति लोके; दात्यूहः कालकण्टकः 'रायुक' इति लोके। प्रभृतिग्रहणाद् गोपापुत्रसारपदेन्द्रादयश्चरकोक्ताः। प्रतुदा इति प्रतुद्य भक्षयन्तीति हेतोः ॥ ६७ ॥

…काणकपोतो वनवासी पाण्डुकपोतः; अन्येऽरुणवर्णकमपि कपोतमाहुः ॥ ६६ ॥

…सिंहः पराक्रमी निद्रालुः; व्याघ्रो विकृतमुखो निद्रालुर्हिंस्रः; वृकः कुक्कुरसदृशः पशु क्षुद्रः; तरक्षुर्मृगशत्रुर्व्याघ्रविशेषः 'जरख' इति लोके; ऋक्षो भल्लूकोऽतिलोमशः 'रिंछ' इति लोके; द्वीपी व्याघ्रभेदश्चित्रव्याघ्रः 'चित्रक' इति लोके; मार्जारो बिडालः, अत्र च मार्जारो गुहाशयत्वादरण्यबिडालो बोद्धव्यः; शृगालः प्रसिद्धः; मृगेर्वारुर्मृगभक्षः शृगालाकृतिः 'हरिणडु (द्र) व' इति लोके…॥ ७२ ॥

…कङ्को दीर्घचञ्चुर्महाप्रमाणः, उक्तं च—"कङ्कः स्यात् कङ्कमल्लाख्यो बाणपत्रार्हपक्षकः। लोहपृष्ठो दीर्घपादः पक्षाढ्यः पाण्डुवर्णभाक्"—इति; कुर-

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रश्चिल्ल्याकारो नादोत्थापितमत्स्यो हस्तमत्स्यग्राही 'कुरल' इति लोके प्रसिद्धः; चाष इन्द्रनीलमणिसदृशपक्षः शस्तदर्शनः 'करटाशन' इति लोके प्रसिद्धः; भासो गोकुलचारी गृध्रविशेषः श्वेतशिखावान्; शशघाती चिल्ल्याकारो महाचरणनखः प्रहारेण शशकाहरणशीलः 'शशाग्नि' इति लोके प्रसिद्धः, अन्ये 'पाजी' इत्याहुः उलूकः कौशिकः; चिल्लिः; चिल्हः, श्येनः सिञ्चानो गरुडान्वयः; गृध्रो मांसाशी योजनदृष्टिः।'''प्रसह्य भक्षयन्तीति प्रसहाः ॥ ७४ ॥

•••वायसः काकः ""॥ ७५ ॥

•••मद्गुमूषिको मालुयासर्पः; अन्ये तु मद्गुमूषिकौ भिन्नावाचक्षेते; तत्र मद्गुः पूर्वार्थ एव, मूषिको वृक्षमूषिकः वृक्षशायिका वृक्षमर्कटिका 'गिली' इति लोके; अवकुशो गोलाङ्गुलो वानरविशेषः; पूतिघासो वृक्षबिडालः सुगन्धिवृषणः 'कर्पूरक' इति लोके; वानरो मर्कटः। •••प्रायेण वृक्षस्थायित्वात् पर्णमृगाः ॥ ७६ ॥

•••श्वाविदित्यादि। श्वावित् सूचिसदृशरोमयुक्ता 'सिहै' इति लोके; शल्यको वज्रशकलो बृहद्गोधानुकारी 'साला' इति लोके; गोधाशशौ प्रसिद्धौ; वृषदंशो ग्राममार्जारः, अन्ये वनमार्जारमाहुः; लोपाकः शृगालभेदः, 'लाङ्गलक' इति लोके; लोमशकर्णो नलत्करः; कदली महाबिडालसमो व्याघ्राकारः 'कदली-हण्ड' इति पौण्ड्रे प्रसिद्धः, अन्ये सर्पविशेषमाहुः, अपरे 'कदलीमृग' इति समस्तं पठन्ति, तत्रापि स एवार्थः; मृगप्रियको गोनसः; अजगरो महासर्पः, सर्पः पुनरल्पो राजिलमण्डलिदर्वीकरभेदात्त्रिविधः; मूषिको भूमिमूषिकः; नकुलो भुजङ्गशत्रुः; तद्भेदो महाबभ्रुः।•••बिलशायित्वाद्बिलेशयाः ॥ ७८ ॥

""संहतं सान्द्रम्""। ७९ ॥

""दर्वीकराः फणाकरा इत्यर्थः। दीपका राजिमन्तः ॥ ८१-८४ ॥

•••अश्वाश्वतरेत्यादि। अश्वो घोटकः; अश्वायां गर्दभेन जनितोऽश्वतरः 'वेसर' इति लोके; गौः प्रसिद्धा; खरो गर्दभः; उष्ट्रः करभः; बस्तश्छगलः, उरभ्रो मेषः; मेदःपुरच्छको दुम्बकः, अन्ये एडकमाहुः•••। प्रायो ग्रामवासित्वाद्ग्राम्याः ॥ ८५ ॥

•••अनुगता आपोऽस्मिन्निति सजलस्थलात्मको देशः, तद्भवा आनूपाः। कूलं नद्यादितटं, तत्र चरन्ति भक्षयन्ति भ्रमन्ति च ये ते कूलचराः। प्लवन्ते पानीये तरन्ति ये ते प्लवाः। कोशः शङ्खादीनां सम्पुटः, तत्र तिष्ठन्तीति कोशस्थाः। पादिनः पादवन्तः"" ॥ ९२ ॥

•••गजो हस्तो; गवयो गोसदृशः; महिषः प्रसिद्धः; रुरुः शरदि शृङ्गत्यागी

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तल्लक्षणं उच्यते—"विकटबहुविषाणः शम्बराकारदेहः सलिलतटचरत्वाच्छम्बरेभ्यो विचित्रः। त्यजति शरदि शृङ्गं रौत्यतोऽसौ रुरुः स्यात् पृथुलमृगविशेषः प्रायशश्चेदिदेशे" इति; चमरः केशमृत्युर्गोसदृशः; सृमरो महाशूकरः, अन्ये तु महाश्वाकारश्चमरान्तकः; रोहितो लोहितवर्णो मृगजातिः, अन्ये तु 'रोहिष' इति पठन्ति व्याख्यानयन्ति च—कच्छशूकरः इत्यर्थः; अपरे फलशूकरमाहुः; वराहः; शूकरः; खड्गी गण्डकः; गोकर्णो गोसदृशकर्णः 'गोन' इति प्रसिद्धः; कालपुच्छको ललत्कृष्णपुच्छकः; ओद्रः पानीयबिडालः, 'ओदन' इति लोके; न्यङ्कुः 'न्यंगुण' इति लोके; अरण्यगवयो वन्यगवयः ॥ ६४ ॥

•••हंसः कलस्वरो ललितगतिः प्रसिद्धः; सारसो लक्ष्मणो रक्तशिराः प्रसिद्धः एव; क्रौञ्चः क्रौंचिरः; चक्रवाको द्वन्द्वचरो निशावियोगी; कुररः अस्य प्रसहेष्वपि पाठः, तेनोभयेषामपि गुणा बोद्धव्याः, अन्ये तु कङ्कमल्लसदृशजलचरं कुररमाहुः; कादम्बः कलहंसोऽतिधूसरपक्षः, अन्ये तु रक्तचञ्चुशिरः कृष्णपादादीनां लक्षणेन कृत्वा 'कयंब' इति पठन्ति; कारण्डवः शुक्लहंसभेदोऽल्पः, अन्ये करह (ई) वमाहुः, उक्तं च 'कारण्डवः काकवक्रो दीर्घाङ्घ्रिः कृष्णवर्णभाक्—'इति; जीवञ्जीवको विषदर्शनमृत्युः; बकः पाण्डुरपक्षः प्रसिद्धः; बलाका बकभेदः 'बगुली' इति लोके; पुण्डरीको नलिननयनः, प्लवो महाप्रमाणः प्रसेवकगलः 'सगड' इति लोके; शरारीमुखः खदिरवर्णो 'गिर्गराटी' इति लोके; नन्दीमुखः पत्राटि आटीभेदः; मद्गुर्जलकाकः; उत्क्रोशः कुररभेदो मत्स्याशी; काचाक्षः कर्पदियाकः 'बहुडी' इति लोके; मल्लिकाक्षः शुक्लशबलः; शुक्लाक्षस्तद्भेदः, अन्ये तु मलिन चञ्चुचरणो हंसभेद एवेत्याहुः; पुष्करशायिका पद्मपत्रशायिका; कोनालकः श्यामपृष्ठश्वेतोदरः 'पानीयवर्तिका' इति लोके; अम्बुकुक्कुटिका जलकुक्कुटी कृष्णवर्णा, 'बुडियाक' इति लोके; मेघरावश्चातकः, अन्ये तु चातकं विष्किरेष्वामनन्ति; श्वेतवारलः शुक्लपक्षः प्रसेवकगलः 'ज्येष्ठबलाका' इति लोके••• ॥ १०५ ॥

•••शङ्खनकः क्षुद्रशङ्खः शङ्खभेद एव; शुक्तिः समुद्रजा शिम्पिः; शम्बूक आवर्तकोशः, 'सांखुला' इति लोके; भल्लूकः कपर्दकः, अन्ये शम्बूकभेदमाहुः••• ॥ १०८ ॥

••••कूर्मः कच्छपः, स तु नानाविधो वर्तुलदीर्घमहदादिभेदेन; कुम्भीरोऽपि नानाभेदो घडियालगोधादिभेदेन; कर्कटोऽपि द्विविधः कृष्णशुक्लभेदेन; शिशुमारो हत्याकारोऽन्तर्वक्त्रो बहिर्निःश्वासमुक्, सोऽपि द्विविधो वर्तुलदीर्घभेदेन, दीर्घं 'फाणित' इति लोकाः प्राहुः•••• ॥ १०९ ॥

•••रोहितो घनशकलः प्रसिद्धः; पाठीनः पुनरशकल एव दीर्घो निर्मलः सोऽ-

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पि 'वोयाल' इति लोके प्रसिद्ध एव; वर्मिः सर्पाकारो मत्स्यः···"कृष्णमत्स्यस्तु शकली बहुकण्टकसंयुतः। कषायवर्णो रक्ताक्षः कथितो मत्स्यवेदिभिः"—इति; वागुञ्जारः 'वाहस' इति लोके; सहस्रदंष्ट्रो महापाठीनः; शेषास्तु कैवर्तेभ्यो ज्ञेयाः···· ॥ ११३ ॥

····शष्पं बालतृणं, शैवालं शैवलम् ॥ ११५ ॥

····ह्रदः 'द्रहः' इति लोके ॥ ११७ ॥

····तिमिर्महत्तमो मत्स्यः; तिमिङ्गिलस्ततोऽपि महत्तमः; कुलिशः 'कुडिश' इति लोके; नन्दिवारलकः 'समुद्रशिम्बाक' इति लोके; मकरो हिंस्रदंष्ट्रकः; गर्गरः स्वनाम्ना प्रसिद्धः; चन्द्रकः पार्श्वेषु कण्टकवलयितो वर्तुलो मत्स्यः; राजीवो वज्राभो बह्वायतः स्वनामप्रसिद्धः; शेषास्तु समुद्रतीरवासिभ्यो···· ॥ ११८ ॥

····महाभिष्यन्दीति दोषधातुमलस्रोतसामतिशयक्लेदकारीत्यर्थः; अन्ये त्वन्यथा कृत्वा पठन्ति, तदुच्यते—"हृदयस्थान्ननिर्यासवाहिस्रोतोमुखानि यत् भुक्तं लिम्पति पैच्छिल्यादभिष्यन्दि तदुच्यते ॥ वैशद्यात् कफहन्तृत्वात्तान्येव विवृणोति यत् । तदुक्तमनभिष्यन्दि द्रव्यं द्रव्यविशारदैः" इति ॥ १२२-१२५ ॥

····उत्क्लेशः थूत्करणम्····॥ १२७-१२८ ॥

····अतोऽस्माल्लघुत्वादल्पाभिष्यन्दित्वाच्च । अन्यथेति महाभिष्यन्दिनो गुरवश्चेत्यर्थः····॥ १३५-१३६ ॥

····सौवीरं महत्तममामपक्वावस्थासु मधुरं मरुदेशजं; सिंचितिकाफलं तद्भेद एवातिमधुरो मुष्टिप्रमाण उत्तरापथजः;····मातुलुङ्गं बीजपूरकं;····आम्रातकमाम्रफलसदृशम् 'अम्राटकं' इति लोके;····प्रियालश्चारो मधुराम्लफलः प्रायशो मगधेषु; ····भव्यमारुकं कार्तिकेयपुरे प्रसिद्धम्, अन्ये तु कर्मरङ्गफलं भव्यमाहुः, 'भव्यं तालफलोपमं केवलवल्कलसंहतिमात्रम्' इत्यपरे; पारावतः कामरूपे फलं पाककाले धवललोहितं मधुराम्लं च; वेत्रफलं पद्मबीजसमं; प्राचीनामलकं प्राग्देशोद्भवं 'पानीयामलकं' इति लोके; तिन्तिडीकं वृक्षाम्लं; नीपं कदम्बफलं; कोशाम्रं 'कौसिम्ब' इति प्रसिद्धं; अम्लिका प्रसिद्धा चिंचा वक्रफला···॥ १३९ ॥

···मेध्यं मेधायै हितम् । केशरं बीजपूरान्तर्गतं तन्तुजालं 'चहुडी' इति लोके ॥ १४९-१५१ ॥

···जाम्बवं जम्बूः राजादनं क्षीरिका; तोदनं राजप्रियं; शीतफलं 'रावणाम्लिका' इति प्रसिद्धं, 'काश्मीराम्लिका' इत्येके; तिन्दुकः कालसारो वृक्ष;····धन्वनं धनुर्वृक्षफलं 'धामण' इति लोके; अश्मन्तको यमलपत्रकः 'आसन्त' इति लोके;

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अश्वकर्णः पूर्वदेशे गन्धमुण्डोऽश्वत्थसदृशः; फल्गुः काकोदुम्बरिका, 'कदुम्बरी' इति लोके। परूषकोऽल्पास्थिर्मृदुफलः 'फालसा' इति लोके; गाङ्गेरुकी नागबला; पुष्करवर्तिः 'आमोदं' इत्युत्तरापथे;....बिम्बी कुन्दरिका...॥ १६३ ॥

...ताडः (लः) ताडी नालिकेरः स्वनामप्रसिद्धाः; पनसो बहिःकण्टकी महाफलः 'कटीहल' इति लोके; मोचः कदलीफलम्....॥ १७७ ॥

....खर्जूरं द्विविधं वृक्षविटपभेदेन, त्रिविधमित्यपरे,....त्रैविध्यं च वृक्षखर्जूरं द्विविधमिति कृत्वा, तत्र पारसीकेषु देशेषु महत्प्रमाणं स्वादु भिन्नं पिण्डखर्जूरमित्यतो हेतोः ॥ १८२ ॥

...वातामादीन्युरुमाणान्तान्युत्तरापथे जातानि, तत्रैव प्रसिद्धानि। केचिद्व्याख्यानयन्ति—तत्र वातामो मज्जमधुरस्निग्धो दीर्घाकारः; अक्षोडो मदनफलाकारफलो मध्ये किञ्चिदुन्नतरेखान्वितः पर्वतपिलुः 'अखरोट्' इति लोके; अभिषुकः 'अभिषु' इति लोके, निकोचकमौत्तरापथिकं कोल्लकफलमुत्तरापथादवगन्तव्यम्... ॥ १८७ ॥

...लवलीफलं सुगन्धिफलं स्वनामप्रसिद्धम्। तल्लक्षणमुच्यते,—"घनस्निग्धा हरितांशुः प्रपुन्नाटसदृक्च्छदा। सुगन्धिमूला लवली पाण्डुकोमलवल्कला" इति ॥ १८६ ॥

...वसिरं सूर्यावर्तफलं देशान्तरे ज्ञेयमित्यर्थः। शीतपाक्यं बलाफलम्। अरुष्करनिबन्धनं भल्लातकवृन्तम् ॥ १६० ॥

....ऐरावतमैरावणिका कृष्णलोहितात्पफला। दन्तशठं जम्बीरफलम्, अन्ये जम्बीरभेदमाहुः। टङ्कं काश्मीरे स्वनामप्रसिद्धं वहुप्रकारम्। ऐङ्गुदमिङ्गुदीफलम्, अन्ये पुत्रञ्जीवकमाहुः....॥ १६१-१६३ ॥

...करीरो मरुजद्रुमः स्वनामख्यातः; आक्षिकमक्षिकीफलं; पीलु पीलुफलम्। तृणशून्यं मल्लिका, केतकीफलमित्यन्ये....॥ १६४ ॥

...तुवरकः पश्चिमोदधितीरे ॥ १६६ ॥

....किंशुकः पलाशः; अरिष्टो निम्बः.... ॥ १६७-१६८ ॥

...व्रणेभ्यो हितं व्रण्यम्। चक्षुषे हितं चक्षुष्यम् ॥ १६६ ॥

....आक्षं बिभीतकफलं...॥ २०० ॥

...जातीकोशो जातीपत्रिका 'जातिवनी' इति लोके।....जातीकटुकयोः फलमिति जातीफलं प्रसिद्धं; कटुकाफलं लताकस्तूरिकेति पञ्जिकाकारो, श्रीब्रह्मदेवस्तु लघुकक्को (ङ्को) लकमाह...॥ २०२ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

•••लताकस्तूरिका दक्षिणापथे विटपः, शकुनापितुल्यः•••॥ २०४ ॥

•••प्रियालमज्जा 'चारुली' इति लोके प्रसिद्धः। शम्पाकः किरमालकः ॥ २०५-२०७ ॥

•••पुष्पफलं कूष्माण्डकः; अलाबूः तुम्बिनी, सा च दीर्घवर्तुलादिभेदादनेकधा; कालिन्दं कृष्णबीजं कूष्माण्डसदृशं 'कलिन्द' इति लोके•••॥ २११ ॥

•••त्रपुसं सुधावासः; 'तेवसा' इति लोके; एर्वारुर्लोमशा कर्कटी; कर्कारुर्वाडवं त्रपुषं 'खरवारू' इति लोके; शीर्णवृन्तं सुवासकं त्रपुसभेदः, अन्ये तु शीर्णवृन्तं कर्बुरमाहुः, एके तु शीर्णवृन्तं पाकावस्थायां यस्य वृन्तं शटितं भवतीत्यर्थः, अपरे तु कर्बुरभेदं खुदपुत्रकमाहुः•••॥ २१६ ॥

••••श्रृङ्गवेरकं शुण्ठी;••••कुस्तुम्बुरुकं धान्यकं; जम्बीरो हरितशाकमुत्तरापथे जम्बीरगन्धि किंचिदम्लं; सुमुखो वनवर्बरिका; सुरसा सुरभिपर्णी 'तुलसी' इति लोके; अर्जकः श्वेतकुठेरकः; भूस्तृणं रोहिषः, तुम्बाकमन्ये; सुगन्धको गन्धतृणमल्पं भूस्तृणं सुगन्धितृणमिति केचित्, तत्रापि नार्थभेदः;••••कालमालो बर्बरिका; कुठेरकस्तद्भेद एव; क्षवकश्छिक्काकरः 'छिकणी' इति लोके; खरपुष्पो मरुवकः, अन्ये क्षवकभेदमाहुः, केचित् 'वोडयिका' इत्याहुः; शिग्रुः शोभाञ्जनकः, सुवासमित्यन्ये; मधुशिग्रुर्लोहितकुसुमोऽल्पविटपः शोभाञ्जनकभेदः; 'शुण्ठ' इत्यत्र क्वचित् (पठ्यते), स च स्वनामख्यातः; फणिज्झकः 'फाणिज' इति लोके, अन्ये मरुबकमाहुः; सर्षपराजिके प्रसिद्धे; कुलाहलो मुण्डितिका; अवगुल्थं वेगनामा, काकादनीत्यर्थः; गण्डीरोऽपि द्विविधः स्थलजो जलश्चेति, तत्र स्थलजो हरितशाकं; तिलपर्णिका चोरकः, श्रीहस्तिनीत्यपरे; वर्षाभूः पुनर्नवा; चित्रकमूलकलशुनाः प्रसिद्धाः; कलायोऽत्र त्रिपुटकभेदः;••••कलायस्त्रिपुटकः; पलाण्डुर्लशुनभेदः••• ॥ २२१ ॥

••••कारवी कृष्ण जीरक उत्तरापथे प्रसिद्धः; करवी यवानीत्येके, अजमोदेत्यपरे अन्ये राजिकामाहुः। उपकुञ्चिका स्थूलजीरक ईषत्कृष्णो 'वृहज्जीरक' इति लोके ॥ २२६ ॥

••••रसोनः पञ्चरसः स्वल्पकन्दो लशुन इत्यर्थः।••••पलाण्डुः स्थूलनालाग्रपत्रो गुन्द्रालिकाभेदः, स एव सक्षीरो मधुररसः क्षीरपलाण्डुरित्युच्यते ॥ २४४-२४८ ॥

•••चुच्चूर्नाडिकाकारपत्रः; 'चुचु' इति लोके; यूथिका वृक्षविशेषः, सा त्रिधा ईषच्छ्वेतपुष्पा, अतिश्वेतपुष्पा, पीतपुष्पा च,: तरुणी स्वनामप्रसिद्धा अन्ये 'वरुण' इति पठन्ति, वरुणकस्तिक्तशाको जलकूलजः; जीवन्ती जीवा 'तण्डुलीयकसदृशी'

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इत्यन्ये, 'डोडिका' इत्यपरे; बिम्बीतिका कुन्दुरिका तस्याः पत्राण्यत्र गृह्यन्ते; नदीभल्लातकः ली (लो) जनकः, अन्ये 'अनन्ताभल्लातक' इति पठन्ति, तत्र अनन्ता लाङ्गलिका 'कलिहारी' इति लोके; भल्लातकवृक्षस्य फलान्यामानि पल्लवाश्च शाकत्वेनाभिप्रेताः; छगलान्त्री वृद्धदारकः, तस्य पत्राणि, बुह्नेत्यपरे; वृक्षादनी बन्दाकः वृक्षकलिम्बुकेत्यन्येः, फञ्जीशाको 'बाड' इति प्रसिद्धः, भार्गीमेके मन्यन्ते;....शेलुः श्लेष्मातकः 'लिसाड' इति लोके;....कर्बुदारः श्लेष्मातकभेदः; कोविदारः; काञ्चनारः....॥ २४६ ॥

...क्षीरवृक्षा अश्वत्थादयः; उत्पलानि नीलोत्पलप्रभृतीनि, तेषां पल्लवाः ॥ २५१-२५३ ॥

....पुनर्नवा श्वेतपुनर्नवा; वरुणो वृक्षविशेषः स्वनामप्रसिद्धः; तर्कारी अरणिका; उरुबूकः शुक्लैरण्डः; वत्सादनी वत्सपुत्रकः 'वत्सवतिया' इति लोके, गुडूचीत्यपरे बिल्वशाकं बिल्वजं; प्रभृतिग्रहणादन्यान्यपि...॥ २५४ ॥

तण्डुलीयकः 'चुलाई' इति लोके; उपोदिका पोइ; अश्वबला तुरुष्कदेशे बृहत्पत्रा मेथिकाभेद एव 'हिस्फित्थ' इति लोके, तन्त्रान्तरे मेथिकाहिस्फित्थयोः पृथग्गुणनिर्देशः कृतः—'वातपित्तहरा तिक्ता लध्वी श्लेष्माविरोधनी। मेथिका तत्समं किञ्चिद्धिस्फित्थं पुष्टिदं गुरु'—इति। चिल्ली क्षेत्रवास्तुकः, 'गौडवास्तुक' इत्यन्ये, यवशाकमाहुरेके, अन्ये तु यवशाकान्तरमाहुः; पालङ्क्या 'पालक्' इति लोके; वास्तूकष्टङ्कवास्तूकः 'टङ्कचुच्चू' इति लोके....॥ २५६ ॥

....मण्डूकपर्णी ब्राह्मी; सप्तला सेहुण्डः, जेज्झटस्तु सप्तलां यवतिक्ताभेदमाह; सुनिषण्णकः 'सिरिबालिका' इति लोके, श्रीब्रह्मदेवस्तु चतुर्दलमाह, तल्लक्षणं कथ्यते—'चाङ्गेरीसदृशैः पत्रैः सुनिषण्णश्चतुर्दलः। शाको जलान्विते देशे चतुष्पत्रीति कथ्यते' इति; सुवर्चला सूर्यावर्तः, केचिन्मारिषसदृशदण्डमार्तगलसदृशपत्रं लप्पसमाहुः; पिप्पलीगुडूच्यौ प्रसिद्धे, पूर्वं पिप्पलीफलमुक्तम्, अत्र तु पत्रं; गोजिह्वा दार्विपत्रिका कर्कशा दीर्घपत्रा 'गोजीभी' इति लोके; काकमाची प्रपुन्नाडौ प्रसिद्धौ: अवल्गुजः 'बाकुची' इति लोके; सतीनो वर्तुलकलायः; बृहतीफलं सामान्याद्बृहतीद्वयस्य फलम्, ...पत्रं च, वार्ताको वृन्ताको वर्तुलफलः 'बइगण' इति लोके; ....कटुकिका अरण्यकासमर्दिका, अन्ये तिक्तारिकामाहुः; अपरे तु कटुतिक्तपुष्पा मर्कफलाकारफलां प्रसिद्धामाहुः;....उरुबूको रक्तैरण्डः, अन्ये तूरुबूकस्य पत्रमत्र गृह्यते,... किराततिक्तको भूनिम्ब; कर्कोटकः प्रसिद्धः, अरिष्टो निम्बः, कोशातकी घोषकः 'तोरइ' इति लोके; वेत्रकरीर वेत्राग्रं; आटरूषको वासकः; अर्कपुष्पी अर्कपत्रसदृशी लता, अन्ये अर्कपर्णमाहुः...॥ २६२ ॥

...कालशाकं कालियाशाकं श्राद्धार्हम्।....नाडिका 'नाली' इति लोके।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

चाङ्गेरी 'अम्लचाङ्गेरी' इति लोके...॥ २७२-२७३ ॥

....लोणिका लोणिया; जातुकं शुक्लशालपर्णी, त्रिपर्णिका दुग्धिका, वनकार्पासीत्यपरे, पत्तूरः शिरबालिकाभेदो महापत्रः, जीवको जीवनामा स्वनामप्रसिद्धः; सुवर्चला सूर्यावर्तभेदः; डुडुरकः स्वनामप्रसिद्धः कुतुम्बको द्रोणपुष्पः; कुठिञ्जरः कुरहञ्जनकः 'कोल्हसुआ' इति लोके, कुनाडिकेति क्वचित्; तत्रकुनाडिका गोनाडीकः, कुन्तलिका चुच्चूसदृशा दीर्घपत्रा, कुरुण्टिका अम्लानसदृशपत्रकुसुमा हरितपुष्पा अन्ये 'कुनालिकाकुरण्टिके उत्तरापथजे' इत्याहुः....॥ २७४ ॥

...राजक्षवकशाकं कृष्णराजिका, अन्ये तु 'राजक्षवको वृहत्पत्रः क्षवथुकाकर' इत्याहुः....॥ २७६ ॥

....पूतिकरञ्जः कण्टकिकरञ्जः, अन्ये तु पूतिकश्चिरबिल्वः, करञ्जो नक्तमालः ॥ २७८ ॥

...ताम्बूलपत्रं नागवल्लीपत्रं 'पर्णम' इति लोके...॥ २७९-२८० ॥

...कोविदारः काञ्चनारस्तद्भेदो वा;.... । वृषो वासकः, अगस्त्यः 'अगथीया' इति लोके ॥ २८१ ॥

...रक्तवृक्षस्य रक्तचन्दनस्य । मुष्ककस्य क्षारवृक्षस्य 'मोखउ' इति लोके, असनो बीजकः...॥ २८४ ॥

...पद्मं पद्मपुष्पं सूर्योदयविकासि । कुमुदं चन्द्रोदयविकासि । कुवलयं कुमुदभेदः...॥ २८५ ॥

....मालती जाती ....॥ २८६ ॥

किंशुकं पलाशपुष्पं, कुरण्टकं सहचरपुष्पम् ॥ २८८ ॥

....मधुशिग्रू रक्तशोभाञ्जनकः, तस्य करीराणि कोमला नालाः....॥ २८९ ॥

....क्षवकश्छत्रकः, कुलेवरं खुखुण्डकः,....अन्ये तु क्षवकं द्रोणपुष्पीसदृशं विटपमाहुः, तन्न तस्यानुद्भिदत्वात्....॥ २९० ॥

....वेणोः करीरा इति केचिन्मधुररसपाकित्वविदाहित्वयोर्विरोधमाहुः.... ॥ २९१-२९२ ॥

....उमासर्षपादीनां यन्त्रादिपीडितानां निःस्नेहकल्कः पिण्याकः । तिलकल्कस्तिलपिण्याकः, सोऽपि यन्त्रादिपीडितः । स्थूणिकाशुष्कशाकानि नानाशाकैः कृता वटकाः....॥ २९४ ॥

....वटकाः पिष्टकासमर्दककूष्माण्डकमूलकादिकृता मुद्गादिकृताश्च । सवाततोदशूला मलाप्रवृत्तिर्विष्टम्भः ॥—

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""मूलकादिशाकमेव किंचित् स्विन्नं क्षुण्णं सुगन्धिकटुद्रव्यान्वितं वटकीकृतं सूदेषु 'सिण्डाकी' इत्युच्यते; सा द्विविधा—आर्द्रा, शुष्का च; शुष्का वटकान्तर्गता, आर्द्रायास्त्वयमेव गुणनिर्देशः ॥ २६५ ॥

""बिसं पद्ममूलम्, अन्ये स्थूलपद्मनालं बिसमाहुः; मृणालं पद्ममूलात् स्थूलप्ररोहः, अन्ये तु सूक्ष्मं नालमाहुः, शृङ्गाटकं जलमध्ये त्रिकण्टकं 'सिघाडा' इति लोके,""मध्वालुकं रोमशं मधुरास्वादमेव, हस्त्यालुकं महत्काष्ठालुकमित्येके""॥ २९८ ॥

"महदल्पभेदेन शतावरी द्विविधा। तस्या एवाङ्कुराः शतावर्यङ्कुरा इत्यर्थः ॥ ३००-३०२ ॥

सुरेन्द्रकन्दो वज्रकन्दः ॥ ३०३-३०४ ॥

""वेणोः करीरा वंशमूलाङ्कुराः ॥ ३०५ ॥

""स्थूलकन्दो ग्राम्यकन्दः; केचित् 'सकलकन्द' इति पठन्ति; तत्रापि स एवार्थः; शूरणः स्वनामप्रसिद्धः, माणकं महापत्रं यथापूर्वमधः पत्रपरित्यागि"" ॥ ३०६ ॥

""कुमुदं श्वेतोत्पलम् उत्पलं नीलोत्पलम्।""वराहकन्द इति वराहकन्दो 'बकालुक' इति प्रसिद्धः, अन्ये तु 'वाराही' इति पठन्ति, वाराही गृष्टिकोच्यते ॥ ३०८-३०९ ॥

""दक्षिणसमुद्रसमीपभवं सामुद्रं, विडं कृत्रिमं स्वनाम्ना ख्यातं; तच्च प्रसारणीकल्कभक्तलवणसंयोगादग्निदाहेन निर्वृत्तं, सौवर्चलं प्रसिद्धं, तदेव निर्गन्धं काललवणमित्युच्यते; रोमकं शाकम्भरीदेशोत्थं, 'रुमासरःसंभवम्' इत्यन्ये, भूमिमुद्भिद्योत्पन्नस्य क्षारोदकस्य सूर्यरश्मिभिर्वह्निना वा क्वथनाद्यल्लवणमुत्पद्यते तदौद्भिदं""। जेज्जटश्चरकमतानुसारेण सैन्धवानन्तरं सौवर्चलं पठति, 'तदसम्यक्, सामुद्रा त् सौवर्चलस्योष्णत्वात्, उत्तरोत्तरमुष्णानीति वचनात्' इति गयी ॥ ३१३ ॥

""सूक्ष्मं सूक्ष्मस्रोतोऽवगाहनशीलम्। वातानुलोमनं मार्गावृतवातस्य स्रोतः शुद्धिकरत्वेन प्रवर्तनं।""व्यवायीति अपक्वमेव देहमखिलं व्याप्नोति पश्चाद्देहस्थमेव पाकमुपैति।""उत्क्लेदि आर्द्रीभावकारि, अन्ये 'प्रकोपयति श्लेष्मपित्तादीन्' इत्याहुः। ""पाकाभिनिर्वृत्तत्वाद्गुडिकाभूतमेव गुडिकालवणं भवति, तच्च 'वृक्षलवणम्' इति ख्यातम् ॥ ३१४-३२० ॥

""ऊषसूतमूषरप्रजातम्। वालुकैलमिति वालुकाः सिकताः ताभिर्युक्ता इला पृथ्वी वालुकैला, तत्र संभवं वालुकैलम्। मूलाकरोद्भवमिति मूलभूतं,

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

आकरो मूलाकरः; प्रशस्यतरस्तुरङ्गमोत्पत्तिभूमिः, तत्रोद्भवं मूलाकरोद्भवम्। कटु चोच्यत इति कटु लवणमिति प्रसिद्धमित्यर्थः ॥ ३२१ ॥

""यवक्षारो यवशूकोद्भवः 'शीतलिका' 'यवक्षार' इति च लोके; स्वर्जिक्षारः 'साजी' इति लोके; पाकेन निर्वृत्तः पाकिमः क्षारपाकविधानोक्तः प्रतिसारणीयः पानीयश्च, 'पाकिमं तूषरपांशुकाभिनिर्वृत्तम्' इत्यन्ये, अपरे पाकिमाद्भिन्नमूषरक्षारमाहुः, टङ्कणक्षारः सौभाग्यापरपर्यायः 'सुहागा' इति लोके"" ॥ ३२२-३२५ ॥

""सारङ्गोऽत्र गौरहरिणः; कुरङ्गश्चतुरङ्गो भेदुलापतिः, एणः कृष्णहरिणः, वर्मीर्मत्स्येषुः, वर्मी रोहितक इत्येके; 'रोहितो मत्स्यानां' इति चरकवचनात्, अन्ये सर्पाकारमत्स्यमाहुः, श्रीब्रह्मदेवस्तु 'वर्मी महाशकलोरोहितभेदोऽत्र, न पुनः सर्पाकारमत्स्यः 'इत्याह; कूर्मः कच्छपः,""खर्जूरं पिण्डखर्जूरं, राजादनं क्षीरिका, परूषकं कषायेषु, परूषकं 'फालसा' इति लोके।""सतीनो वर्तुलकः, वास्तुकष्टङ्कवास्तुकः; चूचूः 'चूच्च' इति लोके, चिल्ली क्षेत्रवास्तुकः, मूलकपोतिका बालमूलकं, मण्डूकपर्णी ब्राह्मी; जीवन्ती 'डोडी' इति लोके, 'जीवन्ती जीवा; तण्डूलीयकसदृशी' इत्यन्ये""॥ ३३२-३३९ ॥

""कृतान्नं संस्कृतान्नं साधितान्नमित्यर्थः""॥ ३४० ॥

""पेया यवागूः, सा विरलद्रवा, तदुपरितनो भागो मण्डः; एतद्द्वयमपि पेयम् ॥ ३४१ ॥

""विलेपी घनसिक्था; सा च लेह्या, तत्र मण्डपेयाविलेपीनां तण्डुलजलप्रमाणादिकं सूपकारा एव जानन्ति""॥ ३४२ ॥

""संतर्पणी तृप्तिजननी। वृष्या शुक्रला। बृंहणी शरीरवृद्धिकरी""॥ ३४३ ॥

""पेया सिक्थसमन्वितेति अत्र पेया यवागूरुच्यते, सा च सिक्थसमन्विता भवति। विलेपी बहुसिक्था स्यादिति बहुसिक्था घृतसिक्था पृथग्द्रवरहिता, अत एव लेह्या।""पेया यवाग्वपरपर्याया सिक्थसमन्विता विरलद्रवा, विलेपी घनसिक्था लेह्या पृथग्द्रवरहितेति भेदत्रयं सिक्थैर्विरहित इत्यादिना श्लोकेनोक्तम्। केचित् "अन्नं पञ्चगुणे तोये, यवागूं षड्गुणे पचेत्। चतुर्दशगुणे मण्डं, विलेपीं तु चतुर्गुणे" इति परिभाषादर्शनात् पेयायवाग्वोर्भेदमाहुः ॥ ३४४ ॥

""पायसो दुग्धघृतण्डुलसिद्धः""सवाततोदशूला मलाप्रवृत्तिर्विष्टम्भः ॥ ३४५ ॥

""कृशरा तिलतण्डुलमाषकृता यवागूः ॥ ३४६ ॥

""परिशुष्कप्रदिग्धयोरयं विशेषः—"भृष्टं बहुघृते सिक्तं मुहुरुष्णाम्बुना मृदु। जीरकाद्यैर्घनं मांसं परिशुष्कं तदुच्यते ॥ तदेव गोरसादानं प्रदिग्धमिति

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विश्रुतम्"—इति। स्थिरं कठिनम्। हर्षणं हर्षोत्पादकम्। बलमुत्साहः, ओजो हृदि स्थितं धातुधाम""॥ ३५३ ॥

""शूलिकाप्रोतमिति लोहादिशलाकारोपितम्""॥ ३५५ ॥

""भर्जितादीनि व्याख्यानयन्ति—"भर्जितं स्याद्धृतादौ तु पिष्ट्वा यत् साधितं पुनः। अपूपादिकृतं पिष्ठं दधिदाडिमसौरभैः। ""अङ्गारादिषु यत् पक्वं प्रतप्तं तदुदाहृतम्""॥ ३५६-३५८ ॥

""खडकाम्बलिकौ यूषविशेषौ। तत्र खडो द्विविधः—सतक्रशमीधान्यः, सतक्रशाकश्च। तथाहि—"सतक्राणि शमीधान्यानि स्निग्धानि संग्राहकाणि खडानि" इति, सतक्रशाकस्तु। कपित्थतक्रचाङ्गेरीमरिचाजाजिचित्रकैः "सुपक्वः खडयूषोऽयमथ काम्बलिको परः॥ दध्यम्ललवणस्नेहतिलमाषसमन्वितः"—इति। तक्राम्लसिद्धः काम्बलिकः; अम्लानां बहुत्वात्। जेज्झटमते तु दधिदाडिममाष-शाकस्नेहयुक्तं व्यञ्जनं खड इत्युच्यते, नलमते तु 'तिलं सुलुञ्चितं कृत्वा पिष्टं क्षीरे त्र्यहोषितम्। पटे पूतं पचेद्धीमानार्द्रकावापिते घृते॥ मरिचाजाजिसा-मुद्रैर्युक्तस्तिलखण्डो भवते—इति काम्बलिकलक्षणं तत्रैवोक्तं—'दधिमस्त्वम्ल-सिद्धस्तु यूषः काम्बलिकः स्मृतः। पुनः सौवर्चलाजाजीबीजपूरकसौरभैः। संयोज्य मथितः स्वच्छ एष काम्बलिको भवेत्"—इति।""दाडिमेन क्रियते योऽम्लो यूषः स दाडिमाम्लः। दध्यम्ल इति दध्ना क्रियते योऽम्लोयूषः स दध्यम्लः॥ ३७६–३७७ ॥

""षा (खा) डवलक्षणमुच्यते—"स्पष्टाम्लमधुरोऽस्पष्टकषायलवणोषणः। अतिक्तः खाडवः कोलकपित्थाद्युपबृंहितः"—इति; खाडवा इति बहुवचनं खाडव-भूयस्त्वप्राप्तये, तच्च विस्तरभयान्न लिखितम्। पानकानि अम्लिकाद्राक्षादि कृतानि एवमादिग्रहणात् सट्टकप्रभृतीनि॥ ३७८ ॥

""तिलविकृतिर्मोदकादिः, पिण्याकविकृतिः फुट्टाढकादिः। तिलपिण्याकस्य शुष्कशाकस्य विरूढकस्य च व्यञ्जनानि देशपुरुषविशेषतो ज्ञेयानि। विरूढमङ्-कुरितं विगतरोहं वा, अन्ये शाकमेवात्यन्तरूढं विरूढमाहुः। सिण्डाकी अनासुता शुष्कार्द्रा सुट्टमेषु, 'अन्नादिष्वासुतसिण्डाकी शुक्तगुणा नोक्तगुणा' इत्येके, ""मूलका-दिशाकमेव किंचित् स्विन्नं क्षुण्णं सुगन्धिकटुकद्रव्यान्वितं वटकीकृतं सुट्टमेषु 'सिण्डाकी' इत्युच्यते, अन्ये तु 'शाकसिक्थमण्डासुतिः सिण्डाकी' इत्याहुः॥ ३८१ ॥

""तत्र रागः—'सितारुचकसिन्धूत्थैः सवृक्षाम्लपरूषकैः। जम्बूफलरसैर्युक्तो रागो राजिकया कृतः'—इति। षाडवाः पुनर्मधुराम्ललवणसंयोगजा नानाविधाः॥ ३८३ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""""रसाला शिखरिणी ॥ ३८४ ॥

""""परूषकं 'फालसा' इति लोके; कोलं बदरः""""॥ ३८८-३९१ ॥

"""भक्ष्या लड्डुकादयः""""॥ ३९२ ॥

""""'मर्दिताः समिताः क्षीरनालिकेरसितादिभिः । अवगाह्य घृते पक्वो घृतपूरोऽयमुत्तमः'; 'घेव (उ) र' इति लोके ॥ ३९३ ॥

"""समितावेष्टिताः पाकघनीभूता मधुरा घृतोदरा मधुमस्तकाः; त एव 'मधुशीर्षका' उच्यन्ते; केचिन्मधुमस्तकशब्देन खज्जकमाहुः । संयावाः पुनः—"समितां मधु (घृत)-दुग्धेन मोदयित्वा सुशोभनाम् । पचेद्घृतोत्तरे खण्डे क्षिपेद्भाण्डे नवे ततः । संयावोऽसौ युतश्चूर्णैः खण्डैलामरिचार्द्रकैः"—इति । पूपाः 'पूआ'—इति लोके । मोदका लड्डुकाः ॥ ३९५ ॥

"""""आमगोधूमचूर्णं च सर्पिःक्षीरगुडान्वितम् । नातिसान्द्रो नातिघनो विष्यन्दो नाम नामतः"—इति । अन्ये तु घृतभ्रष्टतण्डुलान् विष्यन्दशब्देनाहुः, तन्नेच्छति गयी ॥ ३९७ ॥

""""तत्र फेनकाः "विमर्द्य विमलां शुक्लां समितां नातिशर्कराम् । संवेष्टनाय गर्भार्थं खरपाकं घृते पचेत् । फेनकं फनसङ्काशं सम्पूर्णशशिसन्निभम्"—इति ॥ ३९८ ॥

""""स्विन्नपिष्टमुद्गादिकल्को वेसवारः"""अपरे, वेसवारं शुण्ठ्यादिकृतमाहुः""""॥ ३९९ ॥

पललं तिलपिष्टं गुडाद्युपेतं, तेन कृताः पाललाः; इमेऽपि सामिताः । शष्कुल्य इति शष्कुल्यः 'शांकुली' इति लोके ॥ ४०० ॥

""""पैष्टिकाः तण्डुलपिष्टकृताः ॥ ४०१ ॥

विग्रथितं क्षीरं घनत्वमापन्नं कूर्चिका, तया विविधप्रकाराः कृताः कूर्चिकाविकृताः ॥ ४०३ ॥

""""विरूढककृता अङ्कुरितमुद्गादिकृताः ॥ ४०४ ॥

""""किलाटः क्षीरकूर्चिकापिण्डः"""। """यवपिष्टमुष्णोदके सिक्तमीषत्स्विन्नमृदितं शृङ्गाटादिप्रकारं कुल्माषमाहुः 'यवादयः स्विन्ना' इत्येके"""॥ ४०९ ॥

""""वाट्यो यवगोधूमादिभिर्दलितैः कृतः, अन्ये तु भृष्टयवकृतो भक्ष्य इत्याहुः""""॥ """"धाना भृष्टयवाः; उलुम्बा होलकाः; अत्र मुद्गकलायादिशिम्बा अग्निपक्वा 'होलका' इत्युच्यन्ते ॥ ४१० ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""आर्द्रशालिधान्यं मृदुभृष्टं मुसलाघातचिप्पटीभूतावयवं 'पृथुका' इत्युच्यते ॥ ४१५ ॥

""अन्नादनु पश्चात् पीयत इत्यनुपानम्""॥ ४१९ ॥

""धान्याम्लं काञ्जिकं""॥ ४२०-४२१ ॥

""कृष्णगन्धः शोभाञ्जनकः । ""कषायाणां क्षीरवृक्षादिफलानाम् । मधुराणां द्राक्षादीनां, वातामाभिषुकादीनां च । कटुकानां फलानामित्यर्थः । श्वदंष्ट्रा गोक्षुरकः; वसुको बुकः, केदारगिरौ 'बगहुल' इति प्रसिद्धः । शाकानामनुपानं निर्दिशन्नाह । ""जीवन्ती डोडी । ""मण्डूकपर्णी ब्राह्मी""॥ ४३२-४३३ ॥

""दोषसंघातभेदनं दोषसमूहपृथक्करणम् । तर्पणं तृप्तिजनकम् । मार्दवकरं शरीरकोमलतोत्पादकम्""॥ ४३५-४३७ ॥

""अनुपानमिति अनुशब्दं लक्षणार्थमाहुः, आहारं लक्षीकृत्य पानमिति, आहारमाश्रित्य यत् पीयत इत्यर्थः; तेन मध्याद्ययोरप्यनुपानशब्दः प्रयुक्तो भवति ॥ ४३८ ॥

""प्रसेकी लालास्रावी""॥ ४४० ॥

""कार्ष्णायसे कृष्णलोहपात्रे, 'कान्तलोहपात्रे' इत्यन्ते । राजते रौप्यमये । भक्ष्या लड्डुकादयः । ""'वैदलेषु वेत्रवंशादित्वग्ग्रथितेषु'""। "सिक्त्वा बहुघृते भृष्टं मुहुरुष्णाम्बुना मृदु । जीरकाद्यैर्धनं मांसं परिशुष्कं तदुच्यते । तदेव गोरसादानं प्रदिग्धमिति विश्रुतम् ।" ""कट्वरं तक्रम्, अन्ये तु—"सौवीराम्लमथात्यम्लं काञ्जिकं कट्वरं विदुः । अन्ये तु तदधोभागं तक्रं वाऽत्यम्लतां गतम् । सस्नेहं दधिजं तक्रमाहुरन्ये तु कट्वरम्"—इति । खडो यूषविशेषः; स च सतक्रशमीधान्यः; सतक्रशाकश्च । ""वैदूर्यं रत्नविशेषः, ""तत्र रागः "सितारुचकसिन्धूत्थैः सवृक्षाम्लपरूषकैः । जम्बूफलरसैर्युक्तोरागो राजिकया कृतः"—इति षाडवाः पुनर्मधुराम्ललवणसंयोगजा नानाविधाः, विशेषतः सूदेभ्यो ज्ञेयाः । सट्टकस्तु "लवङ्गव्योषखण्डैस्तु दधि निर्मथ्य गालितम् । दाडिमीबीजसंयुक्तं चन्द्रचूर्णविचूर्णितम् । सट्टकं तु प्रमोदाख्यं नलादिभिरुदाहृतम्"—इति । ""तत्र वज्रं षट्कोटिकं रत्नं हीरक इत्यर्थः । ""सूदः सूपकारः । सूपप्रहितमोदनं भक्तम्""॥ ४४९-४५७ ॥

""सुमनः फलैः जातीफलैः ॥ ४८४-४८६ ॥

""जीवनः प्राणधारणः । ""अनुलोमनो वातमलप्रवर्तनः । ""व्यवायी गुणः । अखिलमित्यादि अपक्व एवाखिलं देहं व्याप्नोति पश्चान्मद्यविषवत् पाकं याति; अन्ये 'भावाय कल्पते' इति पठन्ति, तत्रापि स्थितये कल्पते नोर्ध्वमधो वा प्रवर्तत

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इति स एवार्थः; अपरे तु पुनर्भावशब्दमभिप्रायार्थमिच्छन्ति, तत्र नियतद्रवप्रभावेणात्मशक्त्यनुरूपं तत्तद्द्रव्यं मद्यविषवद्विशिष्टाभिप्रायाय कल्पत इत्यर्थः । व्यवायिनः सकाशाद्विकासिद्रव्यस्य किंचिद्भेदं दर्शयन्नाह—विकासीत्यादि । विकासी गुणः । विकसन् प्रसर्पन् । एवमिति अपक्व एव सकलं देहं व्याप्य । धातुबन्धान् विमोक्षयेत् धातुशैथिल्यं करोतीत्यर्थः । अन्ये तु 'सरविशेषो व्यवायी, तीक्ष्णविशेषो विकासि' इति ब्रुवते, तन्नेच्छति गयी । आशुकारी गुणः, आशुत्वात् । सूक्ष्मो गुणः, अत्र स्थूलगुणमपि केचित् पठन्ति; स च पाठो भावान्न लिखितः ''''॥ ५१४–५२४ ॥

चिकित्सा-स्थानं

अध्यायः १

'''चुच्चुः चीचुरिति लोके । उपोदकः 'पोइ' इति लोके ॥ ४१-४२ ॥

'''स्नैहिकेषु च बीजेषु तिलातसीसर्षपैरण्डादिबीजेषु'''॥ ५१-५२ ॥

'''रोहिणीफलमिति रोहिणी हरीतकीभेदस्तत्फलम्; अन्ये तु कटुतुम्बीफलमाहुः; कटुकाफलमिति पाठान्तरम् । ''''अर्जुनः ककुभः'''॥ ६४-६८ ॥

'''समुद्रमण्डूकी जलशुक्तिः, मणिचूर्णानि स्फटिकादिचूर्णानि; श्रीब्रह्मदेवस्तु समुद्रमण्डूकीं मुक्ताशुक्तिमाह, जेज्जटाचार्येण'''॥ ६६-१०० ॥

'''नक्तमालस्य पल्लवाः करञ्जस्य कोमलपत्राणीत्यर्थः ॥ १०१-१०३ ॥

'''दीर्घवृन्तः श्योनाकः । आलं हरितालम् । ''''तत्र रक्तफला शमी प्रलेपे भक्षणे च केशघ्नीति वृद्धवैद्या वदन्ति । ''''आगारगोधिका गृहगोधिका 'ब्राह्मणी' इति लोके । रम्भा कदली । आलं हरितालम् । बीजमैङ्गुदं इङ्गुदीवृक्षबीजम्''' ॥ १०४-१०८ ॥

'''पत्रमाश्वबलमिति अश्वबला उपोदकी तस्या इदमाश्वबलं; ब्रह्मदेवस्तु अश्वबला यवनभूमौ मेथिकाकारबीजा भवतीत्याह । क्षीरवृक्षावटादयः । औदकानि पद्मकुमुदादीनि । '''मूर्वा धनुर्गुणोपयुक्तो लताभेदः । शुकनासा चर्मकारवटः 'कुप्यक' इति कान्यकुब्जे; 'चर्मकारजम्बूपलासिका''''॥ ११२-११८ ॥

अध्यायः २

'''वेशवारैर्निरस्थिस्विन्नस्निग्धपिष्टमांसैः । कृशरा तिलतण्डुमाषकृता यवागूः'''॥ २३-२५ ॥

'''कर्कटाख्या कर्कटशृङ्गी । ''''अमृता गुडूची । हरेणवः कलायाः । मृणालम् उशीरम् । उत्पलं नीलोत्पलम् । ''''सोमलता इत्यपरे'''॥ ३६-४० ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

…चित्रातैलसमन्वितमिति चित्रातैलम् एरण्डतैलं, तत्फलं पुरीषमार्दवं वातानुलोमनं च। ….अश्वकर्णः पूर्वदेशप्रसिद्धोऽश्वत्थसदृशः; मोचकी शाल्मली; मेषशृङ्गं कर्कटशृङ्गं, पुत्रञ्जीवकभेद इत्यन्ये….॥ ५६-६५ ॥

…समङ्गा मञ्जिष्ठा, रजनी हरिद्रा, पद्मा भार्गी, त्रिवर्गः त्रिफला पथ्या हरीतकी…॥ ७३-७४ ॥

…समङ्गा मञ्जिष्ठा। पद्मा भार्गी। सुवर्चला सूर्यभक्ता। हरेणुका रेणुका। तरुणानि आमानि॥ ८२-८४ ॥

….राजवृक्षादाविति आरग्वधादावित्यर्थ….॥ ८६-८८ ॥

…द्रवन्ती चीरितपत्ना। दन्ती चिरबिल्वो वृक्षकरञ्जकः। दन्ती उदुम्बर-पर्णी पृथ्वीका स्थूलजीरकः, एलेत्यन्ये, हिङ्गुपत्रिकेत्यपरे। तेजोवती काकमर्द-निका नीलि निलाञ्जनिका शारदा। भूमिकदम्बो मुण्डितिका। सुवहागोधापदी शुकाख्या चर्मकारवटः। लाङ्गलाह्वाया कलिहारिका। नैपाली मनः शिला। जालिनी कोशातकी। मदयन्ती मेन्दिका नखरञ्जनी। मृगादनी इन्द्रवारुणी। सुधा सेहुण्डः। मूर्वा चोरस्नायुः। कीटारिः विडङ्गः कीटमारिणीत्यन्ये; करञ्जिका नक्तमालफलम्….॥ ८६-६२ ॥

अध्यायः ३

…सतीनो वर्तुलकलायः; सतीनानां वातकराणामपि सर्पिरादिसंस्कृतत्वा-द्यूषो भग्ने युज्यत एव। बृंहणं देहवृद्धिकरम् ॥ ५ ॥

….सर्वगन्धा एलादयः, अन्ये च कटुकफलादयः…. ॥ अत्र च क्षीरपाके इयं परिभाषा स्मरणीया—"क्वाथ्याद्दष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम्। क्षीराव-शेषं कर्तव्यं क्षीरपाके त्वयं विधिः" इति। …अंशुमती शालपर्णी। कालानुसारिवा-तगरं; ….सैरेयकं कण्टशेलुकः। क्षीरशुक्ला क्षीरविदारी। अनन्ता उत्पलसारिवा। मधूलिका मर्कटतृणविशेषः। शृङ्गाटकं त्रिकण्टकं जलजं फलम्…. ॥ ५५-६६ ॥

…त्रपुसं कर्कटीभेदः, अक्षो विभीतकः प्रियालश्चारः…॥ ६७-६८ ॥

अध्यायः ४

…षड्धरण इति षण्णां चित्रकादीनां धरणा मानविशेषा यत्र योगे स षड्-धरणो योगः। तत्र धरणप्रमाणं मध्यमैरेकविंशतिभिर्निष्पावैर्भवति। ….षड्धरणानि कथं सप्तदिनान्युपयुज्यन्ते उच्यते—एकस्मिन् दिने कर्षयोगः, स चाष्टादशनिष्पा-वैर्भवति, तत्र षड्धरणेभ्यः प्रतिदिनं त्रयस्त्रयो निष्पावा उच्छ्रिता भवन्ति; ततः षड्भिस्त्रिकैरष्टादशनिष्पावाः, तैरष्टादशभिः सप्तमं दिनं पूर्यते; अथवा संज्ञैषा षड्धरण इति। ….'कटुकाऽतिविषा क्षपा' इति केचित् पठन्ति….॥ १-४ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""तिल्वकः पट्टिकारोध्रः । कम्पिल्लको रोचनिकावृक्षः फलारुणरेणुः । ""रम्यको द्रेक्का पर्वतनिम्बः 'राजनिम्ब' इति लोके ॥ २७ ॥

""अम्लं काञ्जिकम् । ""हैमवता इति हैमवता उत्तरापथसम्भूताः, ते पुनः कस्तूरीशटीकुष्ठमांसीसरलसुरदारुमुरादयः । दक्षिणपथगाः चन्दनजातीफलकङ्कोललवङ्गादयः""॥ २९ ॥

"" गन्धर्वहस्त एरण्डः, मुष्ककः कृष्णपुष्पमुष्ककः, नक्तमालः करञ्जः, पूतीकश्चिरबिल्वः""॥ ३० ॥

""गण्डीरो द्विविधः स्थलजो जलजश्च, तत्र स्थलजो हरितशाकपठितः; जलजो जलपिप्पलीगण्डीरः; पलाशः शटी; नादेयी जलजम्बूः; कृष्णगन्धा शोभाञ्जनकः; नीपो महाकदम्बः; निर्दहनी मोरटः अग्निमन्थ इत्येके, अपरे चित्रकमाहुः; वैजयन्ती अरणिका; ""वाष्पिकाद्वयं तच्च लोहितं कृष्णं च सिन्धुविषये, केचिद्वर्षाभूद्वयमिति पठन्ति; इक्षुरकस्तालमखाना""॥ ३२ ॥

अध्यायः ५

""शृगालविन्ना पृश्निपर्णी, ""श्यामा त्रिवृद्विशेषः, 'वृद्धादारुक' इत्यन्ये । रास्ना सुरसा । सुषवी पानीयवल्ली । ""सुरभिः रास्ना । ""मयूरकोऽपामार्गः । क्षीरविदारी दीर्घकन्दा भृशं मधुरा । ""बिल्वपेशिका बालबिल्वगिरः""॥ ७ ॥

""बिसं भिषण्टकमिति लोके, मृणालं पद्मनालं, भद्रश्रियं शुक्लचन्दनम् । ""वञ्जुलो वेतसः, गलोड्यं पद्मबीजं, गौरी हरिद्रा, शैवलं शैवालम् । धान्याम्लं काञ्जिकम्""॥ ८ ॥

""श्लेष्मातकः शेलुः 'लिसोडा' इति लोके""॥ १० ॥

""सहा माषपर्णी, सहदेवा गाङ्गेरुकीति प्रसिद्धा, मूर्वा चोरस्नायुः, प्रियालश्चारः; घृतमण्डो घृतस्योपर्यच्छो भागः सैरेयकेत्यादि सैरेयः कण्टशेलुवाकः, सुषवी पानीयवल्ली""॥ १२-१३ ॥

""अभिष्यन्दि दोषधातुमलस्रोतसां क्लेदप्राप्तिजननम् ॥ १७ ॥

""उरुबूकः शुक्लैरण्डः, स्फूर्जकः फणिज्जकाकारः प्रायशः पारियात्रे भवति अर्जकः कुठेरकः, शङ्खिनी यवतिक्ताभेदः""। ताम्रचूडः कुक्कुटः, कृष्णमत्स्यः कुलीरमत्स्याकारोऽशल्कः""॥ १८ ॥

""सहा माषपर्णी""॥ २२ ॥

""शृङ्गवेररसम् आर्द्रकरसम् । शुक्तं चुक्रम्""॥ २४ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

...अजगन्धा 'बोवयिका' इति; गयी तु 'अजगन्धा क्षेत्रयवानी' इत्याह। मातुलुङ्गाम्लः बीजपूरकरसः...॥ २८ ॥

अध्यायः ६

...धान्याम्लं काञ्जिकं, शुक्तं चक्रं, फलाम्लो बीजपूररसः....॥ ४ ॥

...वास्तुकः टङ्कवास्तुकः; जीवन्ती डोडिका, अश्वबला हिस्फीत्थो मेथिकाभेदः; चिल्ली क्षेत्रवास्तुकः, चुच्चुः 'चुचु' रिति लोके...॥ ८ ॥

...मुरुङ्गी मधुशिग्रुः....॥ ९ ॥

....कृतवेधनः कोशातकी। जम्बूः भूमिजम्बूः। उत्तमारणी योधामल्ली। अर्कोऽर्कक्षीरम्। अलर्कः मन्दारः...॥ १२ ॥

...सीधुं शस्यकं....। आस्फोता सारिवा। ....कुल्माषा यवौदनाः....॥ १३ ॥

अध्यायः ७

...वसुको बकपुष्पम्। वशिरो मर्कटसंज्ञस्तृणजातिविशेषः, सूर्यावर्तभेद इत्यन्ये। अश्मन्तकोऽम्ललोटः कोविदारसदृशपत्रकः। कपोतवङ्का कटभीसदृशपत्रो विटपी मध्यदेशे प्रसिद्धः। आर्तगलः ककुभकः सुगन्धिमूलः 'कौहा' इति नाम्ना पूर्वदेशे प्रसिद्धः, अन्ये तु आर्तगलः 'कुखक' इत्याहु, बहिःकेशरः कण्टकितफलो विटप इत्यन्ये। कच्चको मध्यलेखानिचितः ऋजुकपत्र ईषद्रक्तमूलः 'कवहक' इति मालवके प्रसिद्धः, अन्ये तु कच्चकस्थाने 'ककुभ' इति पठन्ति; स च प्रसिद्धः। कुब्जः गुञ्जा। वृक्षादनी बन्दाकः। भल्लुकः श्योनाकः। शाकः कर्कशमसृणपृष्टोदरपत्रो वृक्षस्तस्य फलम्। कतकफलमम्बुप्रसादनं शशकशुष्कपुरीषप्रतिमम्...॥ १-७ ॥

...इत्कटः महती खगाली। मोरट इक्षुमूलम्। पत्तूरः शरबालिका। कुरण्टिका शरबालिकाभेदो लोहितपुष्पः। शिलाजं शिलाजतु। इन्दीवरं शरबालिका भेदो दीर्घपत्रो बहुलपुष्पः; जेज्जटस्तु इन्दीवरं नीलोत्पलं; तन्नेच्छति गयी ॥ ९-१३ ॥

...पिचुकः करीरः; तस्य फलं; 'कार्पासफलं' इत्येके। इन्दीवरं कर्णपूराख्यो महापुष्पः शरबालिकाभेदः; अन्ये नीलोत्पलमाहुः, तन्नेच्छति गयी। अङ्कोलोऽङ्कोटः, कतकः प्रागुक्तः शाकोऽपि ॥ १७ ॥

....तालमूलिका मुषली मूषकपुच्छाकारशिफा....॥ १८ ॥

...त्रिकण्टको गोक्षुरकः। अन्ये तु 'मर्कटकस्य बीजानां' इति पठन्ति; तत्रापि स एवार्थः। अनेन योगेन भिद्यते अश्मरी, शर्करा तु शान्तिमुपैति ॥ १९ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

....यष्टिका यष्टिमधु। ब्राह्मी लवणिका....। एडाख्यया सह शोभाञ्जन-मार्कवौ....। मार्कवो भृङ्गराजः ॥ २४ ॥

अध्यायः ८

...वृक्षादनी बन्दाकः, बृक्षकलम्बिकामपरे। अम्लेन काञ्जिकेन। सौवीरकेण काञ्जिकभेदेन...॥ १२-१६ ॥

आरग्वधः कृतमालकः; निशा हरिद्रा; काला अहिंस्रा...॥ ३० ॥

...कदलीमृगः पूर्वदेशे प्रायशः शबलो दृष्टः, स तु बृहत्तमबिडालसमो व्याघ्राकारो बिलेशयः; लोपाको लाङ्गलकः शृगालभेदः; प्रियकः ललितकोऽजगर प्रायः श्लक्ष्णो दीर्घः...॥ ३७ ॥

....अम्लं काञ्जिकम्, सुरा मद्यभेदः, सौवीरकं काञ्जिकभेदः...॥ ३८ ॥

...ज्योतिष्मती कुङ्कुमर्दनिका, लाङ्गली कलिहारिका, श्मामा त्रिवृद्विशेषः। गोलोमी दूर्वा। तिल्वकः पट्टिकारोध्रः। गिरिकर्णिका श्वेतस्यन्दा। काञ्चनक्षीर्यौ द्वे एकं कङ्कुष्ठम्, अन्या पीतदुग्धा बृहत्पत्री यवतिक्ता..॥३६॥

...नागदन्ती दन्तिनी....॥ ४० ॥

मागधी पिप्पली। समङ्गा अञ्जलिकारिका; वराहक्रान्तेत्यपरे.... ॥ ४३-४६ ॥

....अश्वमारकः करवीरः। स्नुही सेहुण्डः....॥ ४८-४९ ॥

....मलपूः काकोदुम्बरिका। हयमारकः करवीरः। सुधा स्नुही। सुर्वचिका स्वर्जिक्षारः....॥ ५०-५२ ॥

अध्यायः ९

निष्पावो राजशिम्बी....॥ ४ ॥

....उद्दालकः अरण्यकोद्रवः। ....मण्डूकपर्णी ब्राह्मीभेदः। रूपिकापुष्पैः अर्कपुष्पैः....॥ ५ ॥

....मेषशृङ्गी कर्कटशृङ्गी; गयी तु पुत्रञ्जीवकभेदमाह। श्वदंष्ट्रा गोक्षुरकः। शाङ्गेष्टा काकतिक्ता; 'भुंभुरटा' इति लोके; 'गूथकरञ्ज' इत्यपरे। ....ककुभः सुगन्धिमूलो विटपः। पलाशः किंशुकः। पिचुमर्दो निम्बः। समङ्गा स्पर्शरोदनिका; लज्जालुरिति लोके। प्रियालश्चारः। ...तुवरकः पश्चिमसमुद्रभूमिषु प्रसिद्ध एव ॥ ७ ॥

....पिप्पली गजपिप्पली चेत्युपकुल्याद्वयं च बोद्धव्यं, विशाला इन्द्रवारुणी, मूर्वा चोरस्नायुः, षड्ग्रन्था वचा....॥ ८-९ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शाको महाखरपत्रः, 'शाखोट' इत्यन्ये; गोजी गोजिह्वा; काकोदुम्बरिका काष्ठोदुम्बरिका। ....आरेवतः किरमालकः। ....ज्योतिष्कः काकमर्दनिका, तस्याः फलम्। ....शिग्रुर्विटपशाकः, शोभाञ्जनमन्ये। करञ्जिका वृक्ष-करञ्जः....॥ १० ॥

....श्रीनिकेतं नवनीतधूपः सरलनिर्यास इति। रात्रिर्हरिद्रा ॥ ११-१२ ॥

...सिन्धूद्भूतं सैन्धवम्। इक्षूद्भूतो गुडः। केशरं बकुलम्। तार्क्ष्यशैलं रसाञ्जनम् ॥ १३ ॥

हेमक्षीरी कङ्कुष्ठम्। व्याधिघातः किरमालकः। सर्जो लघुसर्जः। अजकर्णो महासर्जः; 'गन्धमुण्ड' इत्येके। स्नानेत्यादि....॥ १४ ॥

....उदुम्बरी भद्रनामा काष्ठोदुम्बरिका महती, मलपूः सैवाल्पविटपा... ॥ १५ ॥

...द्वीपी चित्रकायो व्याघ्रः; तस्येदं चर्म द्वैपम्। मातङ्गो हस्ती, तस्मा.. ज्जातं मातङ्गजं चर्म। ....पूतिः कीटः शस्यादौ वर्षाकाले कर्बुरकः 'तेलिनि' इति प्रसिद्धः; पूर्वदेशे 'पुण्डलिका' इति। ....राजवृक्षः आरग्वधः....॥ १६ ॥

....जलगण्डो जलगण्डीरकः; नदीपिप्पलिकेत्यन्ये। 'गजलेण्डजे क्षारे' इत्यन्ये पठन्ति; तच्च न पठनीयं तन्त्रान्तरविरोधात्...॥ २१-२२ ॥

....नदीजं तापीनदीसमुत्थो माक्षिकधातुः; काकाह्वानोदुम्बरी काकसंज्ञो-दुम्बरिका; या च लाक्षा साऽपि तज्जा सान्निध्यात्; तार्क्ष्यशैलं रसाञ्जनं... ॥ २५-२६ ॥

....आलं हरितालम्। सिंहो रक्तशोभाञ्जनः। क्षीरिणी अर्कपुष्पी... ॥ २७-२८ ॥

वायसी काकतिक्ता 'चिरपोटिका' इति लोके, 'काकमाची' इत्यन्ये फल्गुः काकोदुम्बरिका, 'अवल्गुः' इत्यपरे पठन्ति, अवल्गुः बाकुची; तिक्ता कटुका। पारावतपदी ईषल्लोहितो हंसपदीभेदः। केशराह्वयो बकुलः....॥ २९-३३ ॥

...मदयन्तिका नखादिरागजननी 'मेंहदी' इति प्रसिद्धा। वायसी काक-माची। शकृदादीनि गवां ग्राह्याणि। नीलिका नीलाञ्जनिका शारदफला। नीलिनी नीलिका....॥ ३४-३८ ॥

पूतीकः चिरबिल्वः। नरेन्द्रद्रुम आरग्वधः। सुमना जाती ॥ ४० ॥

...अक्षो बिभीतकः। ...पलांशां पलमेव अंशो यस्याः सा तथा तां पलपरिमाणामित्यर्थः। ....त्रीण्यप्येतानि कुष्ठहराणि रसायनान्यपि। ....अक्षपीडो यवतिक्ता...॥ ४४-४६ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""सप्ताह्वः सप्तपर्णः । ""त्रिभण्डी त्रिवृत्'''॥ ५० ॥

""मालती जाती । स्नुही सेहुण्डः । आस्फोता सारिवा । विषं प्रसिद्धम् । लाङ्गलशब्देन कलिहारिकोच्यते । वज्राख्यः द्वितीयसेहुण्डः । आलं हरितालम्''' ॥ ५४-६३ ॥

अध्यायः १०

'''धानाः शुष्कभृष्टयवाः, उलुम्बकाः सरसा भृष्टयवाः, कुलमाषा यवपिष्टमया अम्लरसस्विन्नाः शृङ्गाटादयः अपूपाः स्थूलपूपाः पूर्णकोशाः यवपिष्टमया एव कुष्ठहितशमीधान्यस्विन्नविदलादिपूर्णकोष्ठाः, उत्कारिका संयावप्रकारा, शष्कुल्यो यवप्रकारेण संस्कृतैस्तिलैर्यवपिष्टेन शष्कुलीकल्पेन विधेयाः, कुणावी यवपर्पटी"" । चित्रा अपूपविशेषः । वेणुयवा वंशफलानि ॥ ४-५ ॥

'''उत्तमारणी उत्तमकरणी, कोशवती देवदाली""॥ ८॥

""श्यामा वृद्धदारकः, सप्तला यवतिक्ता, शङ्खिनी तद्भेदः, तिल्वक; पटिट्कारोधः""॥ १२ ॥

अध्यायः ११

""अपतर्पणं लङ्घनं, अपतर्पणानि व्यायामशोधनानि तिक्तकटुकादिकानि च ॥ ४ ॥

""तुषोदकं तत्रोक्तमेव काञ्जिकं, शुक्तं, चुक्रं""सुरा पिष्टमयी, द्रवप्रधान आसवः""॥ ५ ॥

उद्दालका अरण्यकोद्रवाः । निकुम्भा दन्ती'''॥ ६ ॥

"""“द्रव्यमापोत्थितं क्वाथ्यं दत्वा षोडशिकं जलम् । पादशेषं च कर्तव्यमेष क्वाथविधिः स्मृतः”""॥ ८ ॥

""पारिजातः पारिभद्रकः । ""वैजयन्ती अरणिका । '''शैवलं शेवालं, प्लवो गोपालदमनकः, हठो जलकुम्भिका । ककुभः सुगन्धिमूलो विटपी । '''मधुनो योगवाहित्वान्मेहहरत्वाच्चः । '''राजवृक्षः किरमालकः । '''कदर आपीतसारः खदिराकारः, क्रमुकः पूगफलम् । मूर्वा चौरस्नायुः; दुःस्पर्शा दुरालभा । """“यदप्सु श्रृतशीतासु षडङ्गादि प्रयुज्यते । कर्षमात्रं ततो द्रव्यं साधयेत् प्रास्थिकेऽम्भसि । अर्धश्रृतं प्रयोक्तव्यं पाने पेयादिसंविधौ—” "" ॥ ९ ॥

""अनन्ता उत्पलसारिवा; पद्मा भार्गी, त्रायन्तिका मदयन्तिका; लोहितिका मञ्जिष्ठा, रामतरुणीत्यन्ये; अम्बष्ठा माचिका, ‘सांकुरड’ इति लोके; '''। तालपर्णी मुषली; तुङ्गः पुन्नागः, केशरं नागकेशरं, श्रीवेष्टको नवनीतधूपः

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सरलनिर्यासः, मोचरसः शाल्मलीनिर्यासः। ''''शृङ्गाटकं जलमध्ये त्रिकण्टकं; गिलोड्यः कन्दः प्रावृड्जातः शणपत्राकारो वल्लीयुक्तश्चर्मण्वतीनदीभव (वः) श्वेतवर्तुलपाषाण सदृशः 'गुगिलोट' इति लोके; बिसं पद्ममूलं, तस्य स्थूल-प्ररोहो मृणालं, असनो बीजकः, तिनिशः स्यन्दनः, कट्वङ्गोऽरलुकः; चर्मवृक्षः 'चर्मलोह' इति प्रसिद्धो लकुचद्रुमाकारो महावृक्षः; गिरिकर्णिका श्वेतस्यन्दः, शीतशिवः शतपुष्पाभेदः, निचुलो जलवेतसः, अजकर्णः सर्जः पूर्वदेशे प्रसिद्ध एव, हरिवृक्ष इन्द्रवृक्षः, धवाकार इत्येके, 'कुटज' इत्यन्ये पठन्ति, 'हरिद्रावृक्ष' इत्यपरे पठन्ति; राजादनः क्षीरिका, गोपघोण्टा घाटाबदरी, विकङ्कतः कण्ट-किका''''॥ १० ॥

''''नीवार उलिकाधान्यं, तद्द्विविधम्—एकं धान्यसदृशविटपं धान्यक्षेत्रजं, द्वितीयं महादलकाण्डं तत्तु सलिलजं; तत्र सलिलजं सलिलवृद्धिमात्रस्तम्बप्ररोहं रक्तशूकं; तदेव प्रसाधि (रि) केति तन्त्रान्तरे पठ्यते''''॥ १२-१३ ॥

अध्यायः १२

''''शार्ङ्गेष्टा काकतिक्ता 'भुम्भुरुडक' इति लोके। क्षुद्रा लघुकण्टकारिका। ''''सोमवल्कः कट्फलः''''॥ ६ ॥

अध्यायः १३

''''सैन्धवं लवणम्। अञ्जनं स्रोतोञ्जनं; तस्योत्पत्तिस्थानं वर्णसा सिन्धुश्च महानदः; अथवा वर्णसोद्भवाञ्जनपरिहाराय सैन्धवमुक्तं, तेन सिन्धुमहानदोद्-भवमेवाञ्जनं ग्राह्यम्''''॥ ३५ ॥

अध्यायः १४

'''नीवार उलिकाधान्यम् ॥ ४ ॥

'''चित्राफलतैलं दन्तीफलतैलम्'''' ॥ ५ ॥

''''श्यामा वृद्धदारकः। क्षीरसिद्धास्तण्डुलाः पायसः ॥ ६ ॥

''''किण्वं सुराबीजम् ॥ ७ ॥

'''शङ्खिनी यवतिक्ताभेदः। ''''महावृक्षः सेहुण्डः। महावृक्षक्षीरमात्रा कल्कप्रमाणा। '''गुञ्जा चिरिहिण्टिका। काकादनी वायसतिन्दुका'''॥ ८ ॥

''''सरला त्रिवृत् '''मुरङ्गी शोभाञ्जनकः। श्यामा वृद्धदारुकः। ज्योतिष्कः काकमर्दनिका। ''''स्नुही सेहुण्डः, स च बहुकण्टकः श्रेष्ठः। ''''उत्कारिकां लप्सिकाम्। ''''महावृक्षः सेहुण्डः''''॥ १० ॥

'''जीमूतको देवदाली, इक्ष्वाकुः कटुतुम्बी, धामार्गवो महाकोशातकी''' ॥ १२ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

...इक्षुरकः कोकिलाक्षकः...॥ १३ ॥

अध्यायः १५

....धन्वनो धुनुर्वृक्षो बदरीसदृशपत्रः; नगवृत्तिका 'शल्लकी'...॥ ९-११ ॥

....कृष्णा पिप्पली; तन्मूलं पिप्पलीमूलं; दीप्यकः अजमोदा। ....शाकः कर्कशपत्रवृक्षः, 'सागवन' इति लोके। ....ककुभः सुगन्धिमूलो विटपः...॥ २०-२७ ॥

...कालानुसारिवा कृष्णसारिवा, 'कालानुसारिवा' इत्यत्र केचिदाचार्या अस्मिन् तैले क्षीरशुक्लकं पठन्ति, क्षीरशुक्लकं क्षीरविदारी....॥ २८-३६ ॥

...आदित्यपर्णी सूर्यावर्तः। वीरतरुः स्वनामप्रसिद्धः; अर्जुन इत्येके; कोकिलाक्ष इत्यपरे....॥ ४४ ॥

अध्यायः १६

....मुरङ्गी शोभाञ्जनकः। ....आनूपा महिषादयः, औदकाः कोशस्थादयः; तर्पयतीति तर्पणं.... । वेशवारः संस्कृतमांसविशेषः। कृशरा तिलतण्डुलमाषकृता यवागूः क्षीरसिद्धास्तण्डुलाः पायसः....॥ ४-९ ॥

....क्षीरशुक्ला क्षीरविदारी। समङ्गा मञ्जिष्ठा; वराहक्रान्तेत्यपरे.... ॥ १०-१५ ॥

....सुमना जाती। निचलो वेतसः....॥ १६-२१ ॥

....कुलत्थिका चक्षुष्या....॥ २२-३३ ॥

....सन्धानं मैरेयः; अम्लं काञ्जिकं, सुरा पिष्टमयी; द्रवप्रधान आसवः.... ॥ ३५-३७ ॥

....तिनिः तिनिसः.... ॥ ३९-४३ ॥

अध्यायः १७

....शृङ्गाटकं जलमध्ये त्रिकण्टकम्। गुन्द्रा पहरकभेदः। ....ह्रीवेरः वालकम्। लामज्जक उशीरमूलम्। स्रोतोजं सौवीराञ्जनम्। ...सुगन्धिका उत्पलसारिवा। ....मधूदकं मधुमिश्रमुदकम् ॥ ६-९ ॥

...गौरी हरिद्रा, गोरोचनेत्यन्ये। अरविन्दं पद्मम् अम्बु वालकम्। राजादनं क्षीरिका। ऋषभः कूर्चशीर्षकः स्वनामप्रसिद्धः। मधुनः शर्करा मधुशर्करा। स्थिरा शालपर्णी... ॥ १०-१३ ॥

...अजा अजगन्धा 'बोबई' इति लोके। सरला त्रिवृत्। काला कासमर्दः। एकैषिका शतावरी, अन्ये त्रिवृद्भेदमाहुः। अजशृङ्गी छागलविषाणिका;

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

'उत्तमारणी' इति लोके; गयदासाचार्येण कर्कटश्रृङ्गी व्याख्याता। ....काला-नुसार्या तगरं, चोचः त्वक्, गुञ्जा चिरहिण्टिका, शीतशिवं शतपुष्पाभेदः; इन्द्रपर्णी इन्द्रवारुणी, अत्र गयदासाचार्येण इन्द्रपुष्पी पठिता व्याख्याता च; इन्द्रपुष्पी लाङ्गलकी। पालिन्दिः कालवल्ली, मुञ्जात उत्तरापथजः स्वल्पकन्दः महीकदम्बोऽलम्बुषा मुण्डितिकेति लोके, जेज्टाचार्यो भूकदम्बमाह ॥ १४-१५ ॥

....उत्कारिकाभिः लप्सिकाभिः। नागदन्ती दन्ती। सोमः सोमसंज्ञः; सोमलतेत्यन्ये; कट्फल इति जेज्जटाचार्यः तन्नेच्छति गयी, तस्य तीक्ष्णोऽष्णत्वात् ॥ २०-२१ ॥

....श्यामा वृद्धदारुकः। त्रिभण्डी त्रिवृत्। वृक्षकः कुटजः.... ॥ २२ ॥

...किण्वः सुराबीजम्। ....सुराष्ट्रजा तुवरमृत्तिका। ....निकुम्भो दन्ती। तालीतलं मुशलीमूलं; नलमित्यन्ये पठन्ति; तत्र नलः शुषिरपर्वा स्वनाम प्रसिद्धः। रूपिका श्वेतार्कः। 'नीलीफलरूपिकाभिः' इति केचित् पठन्ति; नीलीफलं शारदं फलं; श्रीफलिकेति लोके ॥ २३-२५ ॥

...कुम्भीकः स्थलकुम्भिका, वनस्पतयो वटाद्याः; ....शलाटूनि कोमलफलानि ग्राह्याणि। सरला त्रिवृत्। सुगन्धिका उत्पलसारिवा। मोचरसः शाल्मली-पुष्पः। अहिपुष्पं नागकेशरम् ॥ २६-२८ ॥

...घोण्टाफलं बदरीफलं; ....अलवण काकमर्दनिका, तस्या इदं पत्रमालव-णम्। ....शङ्खिनी यवतिक्ता। ...वाराहिकन्दो गृष्टिकाकन्दः। ...कोशातकी देवदाली। शुकनासा चर्मकारवटः। मृगभोजिनी इन्द्रवारुणी। ...पिण्डीतकस्त्रि-विधिः कृष्णपुष्पः, श्वेतपुष्पः; पीतपुष्पश्च; तेष्वत्र वराहवर्णपुष्पैर्विभाव्यत इति वरा-हविभावितः कृष्णपुष्पो ग्राह्यः; सुवहा गन्धनाकुली नापिणीति लोके, गोधापदीत्य-परे, कन्दालीत्यन्ये; तस्याः कन्दशकलेषु कन्दखण्डेषु; कृतं संस्कृतम्। ... ते अमर-वरायुधसाह्वया वज्रकन्दास्तेषु। ...मार्कवरसेन भृङ्गराजरसेन ॥ ३४-४१ ॥

अध्यायः १८

...रोहिणी कटुका। अमृता गुडूची। कृष्णगन्धा शोभाञ्जनकः, शमीत्यपरे गोजी गोजिह्विका; शाखोटक इत्यन्ये। तालपत्री मुसली। ...नरेन्द्रः किरमालकः। ...पञ्चाङ्गुल एरण्डः। ...सरला त्रिवृत; केचित् सरलं शालतरुमाहुः.... ॥ ५-७ ॥

...मुचुलुन्दः कण्टकीमदनः, अन्ये मुचुकुन्दमाहुः... ॥ ८-११ ॥

...विकङ्कतवृक्षः कटायिका। आरग्वधः किरमालकः। काकणन्ती गुञ्जा।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

काकादानी वायसतिन्दुका, अहिंस्रेत्यन्ये। तापसवृक्ष इङ्गुदः। पिण्डफला तिक्तालाबुः। काला कटुहिंस्रा''''॥ १२-१३ ॥

'''दार्वी दारुहस्तकः''' ॥ १७-१६ ॥

'''जीमूतको देवदाली। कोशवती कटुकोशातकी। ''''बर्हिष्ठं वालकम्। जीमूतको देवदाली। ''''कैडर्येत्यादि कैडर्यः पर्वतनिम्बः। '''खरमञ्जरिः अपामार्गः'''' ॥ २०-२३ ॥

'''प्रचलाको मयूरः; कृकलासमन्ये प्राहुः''''॥ २८ ॥

''''कर्कारुकं कूष्माण्डं, एर्वारुः ग्रीष्मकर्कटी, प्रियालश्चारः; पञ्चाङ्गुल एरण्डः''''॥ २६-३१ ॥

''''गोजी दार्वीपत्रिका, शाखोटक इत्यन्ये। '''सोमः सोमलता, कट्फलमित्यपरे। '''श्यामा त्रिवृत्, गिरिह्वा श्वेतस्यन्दः; अञ्जनकी नीलाञ्जनिका शारदं फलं, श्रीफलकेति लोके। सप्तलिका यवतिक्ता''''॥ ३२-३४ ॥

''''कांस्यनीलः कांस्यमसी। शुकः ग्रन्थिपर्णः; लाङ्गलाख्या कलिकारिका। काकादनी वायसतिन्दुका'''॥ ३५-३६ ॥

'''निष्पावः शिम्बः। '''आस्फोता सारिवा''''॥ ३७-४० ॥

''''पतङ्गो रक्तकाष्ठम्। आलं हरितालम्''''॥ ४१-४२ ॥

''''काला हिंस्रा; गजादिनामा हस्तिपिप्पली, करहाटं मदनफलम्। एकैषिका अम्बष्ठा, त्रिवृदित्येके; वृक्षकः कुटजः'''॥ ४३-४७ ॥

'''अजगन्धा बोवयिका, विशल्या अग्निशिखवृक्षः; विषाणिका आवर्तनिका, शुकाह्वयः चर्मकारवटः'''॥ ४८-५० ॥

'''श्यामा त्रिवृत्, सुधा सेहुण्डः; लोहपुरीषं लोहमलम्; अन्ये तु लोहमगरं वदन्ति, तथा पुरीषं कपोतपारावतविट्''''॥ ५२-५५ ॥

अध्यायः १६

''''सरला त्रिवृत्। ''''निचुलो वेतसः''''॥ २८-२६ ॥

'''अञ्जनं रसाञ्जनम्। मृणालं पद्मनालम्''''॥ ३०-३२ ॥

शालः शङ्कुः, अश्वकर्णः पूर्वदेशप्रसिद्धोऽश्वत्थसदृशः, अजकर्णः 'पियासाल्' इति लोके। पत्तूरः सिरिवालिका॥ ३३-३५ ॥

''''वैजयन्ती अग्निमन्थवृक्षः ॥ ३६-३६ ॥

सौराष्ट्री तुवरमृत्तिका। पुष्पं पुष्पाञ्जनम् ॥ ४०-४१ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

"'श्वेतः श्वेतस्यन्दः; काम्बोजिका कूविका; गयी तु माषपर्णीमाह। तिनिशः स्यन्दनः। क्षीरिणो वटादयः। '''गोजी गोजिह्वा''''।। ४२-४४ ।।

''''एलुकाख्यम् एलवालुकम्। '''कण्टकिकरञ्जः पूतीकरञ्जः, चिरबिल्व इत्यन्ये। '''पाकिमं लवणं विडलवणम्''''।। ५६-६२ ।।

''''काकादनी कालाहिंस्त्रेत्यर्थः। '''कदम्बपुष्पी अलम्बुषा मुण्डतिकेति लोके प्रसिद्धा। मन्दारी आली, लम्बा कटुकालाबुः। शुकनसा चर्मकारवटः'''
।। ६३-६६ ।।

''''द्रवन्ती शम्बरी। त्रिवृता त्रिवृत्। दन्ती दन्तिनी। नीली शारदं फलं श्रीफलिकेति लोके। श्यामा वृद्धदारुकः। शङ्खिनी यवतिक्ताभेदः''''
।। ६८-६९ ।।

अध्याय २०

''''शुक्तिः जलशुक्तिः। श्रुघ्नी स्वर्जिका''''।। १-४ ।।

'''सारतैलेन शिंशपागुरुसरलदेवदार्वादितैलेन''''।। १७-१८ ।।

''''शिला मनःशिला''''।। २१-२२ ।।

''''कुटन्नटः तगरः। '''दुःसाध्योऽयं व्याधिर्न शक्यते रसायमन्तरेणापनेतुं; रसायनमष्टादश दिव्यौषधयः सोमश्चौषधराजा''''।। २४-२६ ।।

'''मार्कवो भृङ्गराजः'''।। २७-२८ ।।

अध्यायः २१

'''अश्वकर्णः पूर्वदेशे 'गन्धमुण्ड' इति ख्यातोऽश्वत्थसदृशः। पतङ्गं रक्तचन्दनम्।। १०-१२ ।।

अध्यायः २२

''''श्रीवेष्टकः सरलनिर्यासः'''' ।। १-६ ।।

''''पत्तङ्गं रक्तचन्दनं'''' ।। १४-१८ ।।

''''काकोदुम्बरिका काष्ठोदुम्बरिका, गोजी गोजिह्वा। निचुलो वेतसः ''''।। १९-२३ ।।

''''तेजोवती काकमर्दनिका'''' ।। २४-२५ ।।

''''स्वादुकण्टको गोक्षुरः, कण्टकारिवृक्षमन्ये ।। २६-३३ ।।

''''सन्तानिका 'सर' इति भाषा; क्षीरसान्निध्यात् सन्तानिकाघृते क्षीरोत्थ एव'''' ।। ३४-४० ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""कुटन्नटः श्योनाकः । किणिही कटभी, सरला त्रिवृत्"" ॥ ४९-५८ ॥

""पतङ्गं रक्तचन्दनम् । श्वेता श्वेतस्यन्दा"" ॥ ५९-६६ ॥

""शालः शङ्कुः, राजादनः क्षीरिका, सारः सारवृक्षः खदिरादिः । ध्यामं गन्धतृणं, कालानुसारिवा कालवल्ली । श्रीः नवनीतखोटिः सरलनिर्यासः, सर्जरसः राला ।"'टिण्टुकः श्योनाकः"" ॥ ६७-७५ ॥

अध्यायः २३

""हरितकः कुठेरशिग्रुसुरसासुमुखासुरिभूतृणादिः""॥ ४ ॥

"'अम्लं काञ्जिकम्"' ॥ १०-११ ॥

"'वर्षाभूः रक्तपुनर्नवा ।"'मयूरकः अपामार्गः । सहा माषपर्णी, मुरङ्गी शोभाञ्जनकः । क्षारो यवक्षारः । "'वृक्षकः कुटजः नक्तमालः महाकरञ्जः । ""सुवर्चला सूर्यावर्तः । शाङ्गेंष्टा काकजङ्घा""॥ १२ ॥

अध्यायः २४

""भिल्लोटको हि पर्वते केदारभूमौ प्रसिद्धः । गयी तु भिल्लोटककषायमन्त-र्मुखप्रक्षालनमाह""॥ १५-१६ ॥

""जातीशब्देन जातीफलं कथ्यते ॥ २१-२४ ।

केशप्रसाधनी कङ्कतिका 'काकुइ' इति लोके""॥ २९ ॥

""वृष्यं शुक्रवृद्धिकरं, प्रभावात् ॥ ६९ ॥

""सरीसृपाः कृष्णसर्पादयः । व्याला व्याघ्रादयः । विषाणिभ्यः शृङ्गिभ्यः "" ॥ ७६-७७ ॥

अध्यायः २५

""खरमञ्जरिः अपामार्गः । अवल्गुजा बाकुचिका ।""तालपत्री मुशली । ""कुलीरः कर्कटः, गोधा 'गोसाप्' इति भाषा । सरला धूपकाष्ठः"" ॥ १३-२७ ॥

""तीली नीलाञ्जनिका शारदफला, 'श्रीफली' इति लोके । भृङ्गराजो मार्कवः । पिण्डीतकं कृष्णं कृष्णपुष्पो मदनः"" ॥ २८-३१ ॥

""सैरीयकः कण्टसेलीयाकः,""मार्कवो भृङ्गराजः । चूत आम्रः । पुनर्नवे द्वे शुक्ललोहिते । कर्दमः पद्मिनी मूलपङ्कः । पिण्डीतको मदनकः, तस्य यत्फलं पाण्डुरवर्णं भवति तदिह ग्राह्यम् । बीजसारं असनसारम् । अञ्जनं नीलवर्णं रसाञ्जनं, अन्ये स्रोतोऽञ्जनमाहुः । नीरजं नीलोत्पलम् ।""मोदयन्ती मल्लिकेति लोके ख्याता"" ॥ ३२-३७ ॥

"'अरिष्टपत्रं निम्बपत्रं, फेनिलवृक्षपत्रं वा ।""मदयन्तिका 'मेंदी' इति लोके यस्याः पिष्टैः पत्रैर्नखानां रागं स्त्रिय उत्पादयन्ति"'॥ ४३ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अध्यायः २६

…तथाऽन्यत्रापि 'वाजीवातिबलो येन यात्यप्रतिहतः स्त्रियः' इत्यादि-लक्षणं वाजीकरणम्। तत् त्रिविधम् — जनकं, प्रवर्तकं, जनकप्रवर्तकं चेति। तत्र जनकं मांसघृतादिकं, यतस्तद्रसादिधातुक्रमेण परिणतं सत् प्रधानधातुपुष्टिं करोति; प्रवर्तकमुच्चटाचूर्णादिकं शुक्रवैरेचनिकं, न च तस्य वैरेचनिकोक्त्या शुक्र-क्षयकारित्वं स्यात्, अतो विरेचनं शुक्रस्य पतनायाभिमुखीभावमात्रकरणं; जनकप्रवर्तकं तु गव्यघृतगोधूममाषकाकाण्डफलादिकम्। केवलं देहबलकरं जनकं गोधूमादिकं, केवलमनोबलकरं सङ्कल्पादि तु प्रवर्तकं, घृतक्षीरादि देहमनो-बलकरं सदुभयकरमिति। वृष्यादिद्रव्याणां सद्यः शुक्रादिकरणे प्रभावोऽयम्। तथा च श्रीवाग्भटः— "केचिदाहुरहोरात्रात् षडहादपरे, परे। मासात् प्रयाति शुक्रत्वमन्नं पाकक्रमादिति॥ वृष्यादीनि प्रभावेण सद्यः शुक्रादि कुर्वते। प्रायः करोत्यहोरात्रात् कर्मान्यदपि भेषजम्…" (वा० शा० अ० ३) ॥ ६-८॥

…परिभाषामा—"द्रव्यादष्टगुणं क्षीरं क्षीरात्तोय चतुर्गुणम्। क्षीरावशिष्टं कर्तव्यं क्षीरपाके त्वयं विधिः" — इति…॥ १८-१९॥

…बस्ताण्डे अजमुष्कौ। शिशुमारस्य 'अण्डे' इति शेषः। कुलीरः कर्कटकः, 'गृहचटक' इत्यन्ये, 'कुलीरो मत्स्यविशेष' इत्यपरे। कूर्मः कच्छपः। नक्रो मत्स्यभेदः; 'घडियाल' इति लोके। अण्डमत्र प्राणाधारो वर्तुलः नतु मुष्कः। ऋषभो वृषभः। बस्तः छागः। तेषां शुक्राणि गुरूपदेशात् तदाधार-भूतान्येवाण्डानि॥ २५-२६॥

…स्वयंगुप्ता कपिकच्छूः। इक्षुरकः कोकिलाक्षः 'तालमखाना' इति लोके। उच्चटा शणघण्टाकारः स्वल्पविटपः प्रायशो हिमवति सरयूनदीतीरे दृश्यते… ॥ २७-३६॥

अध्यायः २७

…अजकर्णो महासर्जः, 'गन्धमुण्ड' इति लोके। …चन्दनं रक्तचन्दनं, सितचन्दनमित्यपरे…॥ ८-१०॥

अध्यायः २८

…अवल्गुजा बाकुची, साऽपि श्वेता गृह्यते। कृष्णाया बाकुच्याः, तेन कृष्णावल्गुजफलानां पिण्डं गोमूत्रेण पाययेत्। 'कृष्णायाः पिप्पल्या' इति जेज्जटः, तन्नेच्छति गयी। …ब्रह्मवर्चसी तेजस्वीत्यर्थः…॥ ३-४॥

…पुष्करं पद्मवराटकम्…॥ ५-६॥

हैमवत्या वचायाः श्वेतवचाया इत्यर्थः…॥ ७-८॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

"'गोचन्दना प्रियङ्गुः। मोहनिका पुत्रञ्जीवी; 'अवाक्पुष्पी' इति अपरे''''॥ २०-२६ ॥

अध्यायः २९

''''वल्ली लता; प्रतानं दूर्वाशैवलकमूलानामिव विस्तारः; क्षुपको विटपः '''॥ १०-१२ ॥

''''हठः जलकुम्भिका'''॥ २७-३१ ॥

अध्यायः ३०

''''तिल्वको रोध्राकारो बृहत्पत्रो रक्तत्वग्वैरेचनिकः; सप्तला यवतिक्ताभेदः; शङ्खिन्यपि तद्भेदः, विषाणिका मेषशृङ्गी, गवाक्षी इन्द्रवारुणी; कम्पिल्लको रेचनिका स्वनामख्यातः, शम्पाकः किरमालकः, नीलिनीं नीलाञ्जनिका शारदं फलम्। जीमूतो देवदाली, कृतवेधनः कोशातकी, इक्ष्वाकुः कटुतुम्बी, धामार्गवो महाकोशातकी। ''''खरमञ्जरी अपामार्गः, मधुशिग्रुः शोभाञ्जनकः, सूर्यवल्ली पटोलसदृश वल्ली, ज्योतिष्मती काकमर्दनिकाः''' । पूतीकः चिरबिल्वः, कृतमालः किरमालः। तुरवकः पश्चिमसमुद्रभूमिषु पलाशानुकारी वृक्षः। ''''त्रपुसः सुधावासः, त्रपुसीति लोके, एर्वारुर्लोमशा फर्कटी, कर्कारुः वाडवं त्रपुसं 'खेरसा' इति लोके। ''''कपोतवङ्का ब्रह्मसुवर्चला, अवल्गुजो बाकुचीः; ''''। पिचुमर्दो निम्बः; अतिमुक्तकः अवन्तकः, भाण्डी 'भाण्डनी' इति लोके प्रसिद्धो विटपो भाण्डधावनार्थमासुतीवलाः समाहरन्ति। प्रियालः चारः। पिण्डीतको मदनः। श्रवणः तापसवृक्षः 'इङ्गुदी' इति लोके, कङ्गुकं प्रियङ्गुः, टुण्टुकः स्योनाकः। पीतदारु देवदारु'''' ॥ ५ ॥

'''स्नेहाश्चत्वारः सर्पिस्तैलवसामज्जानः। दधिमस्तुको दधिसरः। '''प्रक्षुद्रा क्षुद्रावगाढाः क्षुद्रं फणितं 'काकवी' इति लोके'''॥ ३८-४४ ॥

अध्यायः ३२

''''कृशरा तिलतण्डुलमाषैः कृता यवागूः, क्षीरसिद्धास्तण्डुलाः पायसः, उत्कारिका लप्सिका वेशवारः 'चटनी' इति भाषा'''॥ १२ ॥

अध्यायः ३३

''''फलाम्लं बीजपूरादि''''॥ २० ॥

'''सरस्य भावः सरत्वमानुलोम्यं, गयी तु विसरणस्वभावत्वं सरत्वमाह; सूक्ष्मस्य भावः सौक्ष्म्यं सूक्ष्मस्रोतोऽनुसारित्वं; तीक्ष्णस्य भावस्तैक्ष्ण्यं शीघ्रतरदोषस्रावणकरत्वम्; उष्णस्य भाव औष्ण्यं, सौम्यद्रव्योपमर्दनकरणसामर्थ्यं; विकाशिनो भावः विकाशित्वं, विकाशिभावेन धातोः शैथिल्यकरणसामर्थ्यम्।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अत्र प्रकृतिः, स्वभावः, शक्तिविशेषः, प्रभावो, वीर्यमित्यनर्थान्तरम् । तेन प्रकृत्या वीर्येणान्यथागतमूर्ध्वंगतं, सत्यपि सरत्वादिविरेचनगुणसाम्ये वमनस्योर्ध्वंगामित्वं प्रभावविभावितं, कुतः ? यत उच्यते—"कटुकः कटुकः पाके चित्रको वह्निदीपनः । तद्वद्दन्ती प्रभावात्तु विरेचयति सा नरम्"; तथाच—"विषं विषघ्नमुद्दिष्टं प्रभावस्तत्र कारणम्"—इति; तथा—"ऊर्ध्वानुलोमिकं यच्च तत्प्रभावप्रभावितम्" (च० सू० अ० २६) इति । एतेनैतदुक्तं भवति—सरत्वादिभिर्गुणैर्विरेचनमधो दोषानपहरेत्; वमनस्य तुल्यगुणत्वेऽपि वीर्येणोर्ध्वगामित्वम् । पञ्जिकाकारेण 'प्रकृत्या गतमन्यथा' इत्यत्र 'सम्यग्युक्त्याऽतथाऽन्यथा' इति पठित्वैवं व्याख्यातं—सम्यग्युक्त्या सरत्वादिगुणैर्विरेचनमाधोभागेन, वमनमूर्ध्वभागेन दोषानपहरेत्; अतथाऽन्यथेति नञत्र वैपरीत्ये: अतथा असम्यग्युक्त्या विरेचनं च वमनं चान्यथा दोषविपरीतान् गुणान् हरेदिति । केचित्तु 'सम्यग्युक्तं वृथाऽन्यथा' इति पठन्ति । अयमर्थो युक्तः किल; सरत्वादयो गुणाः सुयुक्ता आशुतरदोषहराः तथैव चान्यायोपयुक्ता एव जीवशोषितधातुरसेन्द्रियमनओजःप्रभृतीनाक्रुष्य मारयन्तीति ॥ ३३ ॥

कीदृशं सत् पुनर्विरेचनं वमनद्रव्यं च दोषानादाय अध ऊर्ध्वं च यातीत्याह—यात्यधो दोषमित्यादि । विरेचनद्रव्याणि स्थिरगुर्व्योः पृथिव्यम्भसोर्गुणभूयिष्ठानि, अत एव स्थिरत्वात् पच्यमानानि गुरुत्वादधो यान्ति; वमनद्रव्याणि तु वाय्वग्न्योः शीघ्रगलघुगुणयोर्गुणभूयिष्ठानि, अतः शीघ्रगत्वादपक्वान्येव लघुत्वादूर्ध्वमुत्तिष्ठन्ति । द्रव्याणि हि द्रव्यप्रभावात् गुणप्रभावाच्च कार्मुकाणि भवन्ति ॥ ३४ ॥

अध्यायः ३७

""यत्र शट्यादौ पौष्करं कुष्ठं च यत्पठ्यते तत्र पौष्करं मूलं, तद्विटपशाखाश्च कुष्ठमिति ज्ञेयम् । अमरदारुः देवदारुः सिन्धुजं सैन्धवम् । नराधिपः कृतमालकः । सरतीति सरला त्रिवृत्, विरेचनीयत्वात् । श्यामा वृद्धदारुकः""
॥ ७-१४ ॥

आमिषं गुग्गुलुः । सुरद्रुमो देवदारुः । तस्करः चोरकः ॥ १५-१८ ॥

""गुडूची हरीतकी चेति अमृताद्वयम् । सहचरः सैरीयः, वरी शतावरी, विश्वा शुण्ठी; काकनासा वायसपल्ला ॥ १९-२६ ॥

श्यामा प्रियङ्गुः । जीमूतो मुस्तकः""॥ २७-२९ ॥

रक्ता मञ्जिष्ठा, गुन्द्रा पट्टोरकभेदः । तृणमूलं कुशकाशादितृणपञ्चमूलम् ॥ ३०-३२ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इन्द्रसुरा इन्द्रवारुणी। शाङ्र्गेष्टा भुम्भुरुट्टाको वेष्टितफलः काकमाच्यनुकारः। कट्वी कटुका।···श्यामा वृद्धदारुकः। निचुलो जलवेतसः। रेणुः पर्पटकः·····॥ ३३-४२ ॥

औरभ्रो मेषस्य, शौकरो वन्यशूकरस्य, आजः छागस्य···॥ १०७॥

···फलं मदनफलम्। ···शुक्तं चुक्रम्·····॥ ११७-१२२ ॥

अध्यायः ३८

····फलं त्रिफला। सरलो वृक्षविशेषः। ···शक्रजा यवा इन्द्रयवाः। मधूलिका तृणविशेषः 'मर्कटिका' इति लोके ॥ २४-२८ ॥

···शम्पाकः किरमालकः। निशाच्छदः शटी। ····अम्भोदः मुस्ता···· ॥ ४३-४६ ॥

···अब्दो मुस्ता, उत्पलं नीलोत्पलम्, रेणुः पर्पटकः। आत्मगुप्ता कपिकच्छूकः श्यामा प्रियङ्गुः। फलं मदनफलम्···॥ ५१-५४ ॥

····अनन्ता उत्पलसारिवा। ····अभीरुः शतावरी····॥ ५५-५६ ॥

····भद्रा कट्फलं · ॥ ६०-६३ ॥

····इन्द्राह्वः कुटजः···· ॥ ६४-६६ ॥

····निशाच्छदः शटी षड्ग्रन्था वचा····॥ ६७-७० ॥

····चटका ग्रामचटकाः तेषामण्डानि, उच्चटा घुर्घुराख्यः शणघण्टकारफलोऽल्पो विटपः सरयूपकण्ठे हिमवति वारेन्द्रयां च प्रायश उपलभ्यते···॥ ८४ ॥

····ऐरावती नागबला, शेलुः श्लेष्मातकः, धन्वनो धनुर्वृक्षः यस्य 'धामन' इति लोके प्रसिद्धिः····॥ ८५-८६ ॥

अध्यायः ४०

···अभिष्यन्दि उपलेपकारि····॥ ३१ ॥

कल्पस्थानं

अध्यायः १

····जीवजीवकः पक्षिविशेषः, 'क्रुरिच' इति लोके।····भृङ्गराजो भ्रमरको धूम्याट-सदृशः पक्षिराज इति लोके···· । पृषतः चित्रबिन्दुः, 'चित्तल' इति लोके ····॥ २८-३३ ॥

····नलदं मांसी, लामज्जं उशीरभेदः····॥ ३४-३६ ॥

····श्यामा श्यामालता, प्रियङ्गुरित्यपरे; इन्द्रा इन्द्रवारुणी; गोपा सुगन्धमूला सारिवा; 'इन्द्रगोप' इत्यन्ये पठन्ति, तत्रेन्द्रगोपः कीटविशेषः; सोमा गुडूची, सोमलतेत्यन्ये: उत्पलं नीलोत्पलम् ॥ ३७ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""अलाबुः तिक्तालाबुः; कोशातकी घोषकः घुसेण्डिकेति लोके। उदश्विव् तक्रम् ॥ ४०-४१ ॥

""नीलिनीफलं नीलाञ्जनिकाफलं, यस्य श्रीफलेति लोके प्रसिद्धिः"" ॥ ४२-४३ ॥

""शिरीषमाषकाः शिरीषबीजानि ॥ ४८-५० ॥

"'वेणुपत्रिका वंशपत्राणि; अन्ये वेणुपत्रिकां वंशसदृशपत्रिकां द्रव्यान्तरमाहुः। सोमवल्ली गुडूची। अमृता अमृतासङ्गः खर्परिकातुत्थकं, उत्तरपदलोपात्। श्वेता श्वेतस्यन्दः। कालीयकं दारुहरिद्रा""॥ ५१-५४ ॥

""ऋष्यो नीलाण्डः 'रोरु' इति प्रसिद्धः। कालखण्डलग्ननलिकामध्यगतजलं पित्तम्। श्यामा प्रियङ्गुः; पालिन्दी त्रिवृत्, मूषिकपर्णी द्रवन्ती, द्रव्यान्तरमित्यन्ये""॥ ५६-५८ ॥

""पयस्या अर्कपुष्पी। फञ्जी भार्गी। बन्धुजीवो मध्याह्नपुष्पकः''' ॥ ६०-६१ ॥

'''सश्वेतं वचासहितं; गयी तु श्वेतां कटभीमाह। समदयन्तिकं मल्लिकासहितम्''' ॥ ६३-६४ ॥

""बहुपत्रा मयूरशिखा। सोमवल्कः कट्फलः''' ॥ ६७-६८ ॥

""मुष्ककः कालमुष्ककः। अजकर्णः सर्जः पूर्वदेशे प्रसिद्धः। फेनः समुद्रफेनः। गोपित्तं गोरोचना''' ॥ ६९-७१ ॥

अध्यायः २

""तीक्ष्णं राजिकामरिचादिवत्। सूक्ष्मं सूक्ष्ममार्गानुप्रवेशि। आशु शीघ्रं प्रहणनकारि। व्यवायि सकलं देहं व्याप्य पश्चात् पाकंयाति। विकाशि प्रसर्पदपसर्पद्धातुबन्धशैथिल्यकारि। विशदम् अपिच्छिलम्। लघु लघुगुणयुक्तम्।"" विकाशित्वादिति हिंसनशोलत्वात्"" ॥ १९-२३ ॥

""कोशातकी घोषकः; अग्निकः अजमोदः 'मोटर' इत्यन्ये; सूर्यवल्ली पटोलसदृशपत्रा, यस्याः पत्ररसेनोक्तं मासं स्विन्नमिव भवति; अन्ये सूर्यावर्तमाहुः किणिही कटभी, शैलुः श्लेष्मातकः, गिर्याह्वा श्वेतस्यन्दः, पुनर्नवे सितपीतपुष्पे ''' ॥ ४४-४६ ॥

'''पुन्नागः तुङ्गः पूर्वदेशे प्रसिद्धः; एलबालुकं स्वनामप्रसिद्धं; नागपुष्पं नागकेशरं; ध्यामकं कत्तृणं; स्थिरा शालपर्णी"" ॥ ४७-४९ ॥

'''ध्यामकं कत्तृणं; शावरो रोध्रः; परिपेलवं वन्यकः, कैवर्तमुस्तकमन्ये; तोयं बालकं; सुवर्णगैरिका दक्षिणापथे प्रसिद्धम्''' ॥ ५०-५२ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अध्यायः ३

""मकरो जलजन्तुरित्येके, अन्ये आग्नेयकीटपठितं मकराकारत्वेन मकरं, कर्कटवृश्चिकं मकरमन्ये। "गोधा पञ्चनखी पवित्रा सौम्यकीटपडिता; कृष्ण-शब्दस्य लोपात् कृष्णगोधां विदुरन्ये। प्रचलाकं सौम्यकीटपठितं कीटविशेषमाहुः। गृहगोधिका कोष्ठागारी कोष्ठगृहकारिका"" ॥ ५ ॥

""अश्वकर्णः पूर्वदेशे प्रसिद्धो गन्धमुण्डः अश्वत्थसदृशः; असनो बीजकः; पारिभद्रः फलभद्रो रक्तकुसुमः कण्टकी रोहिणीसदृशपत्त्रः पूर्वदेशे प्रसिद्धः राजद्रुमः किरमालकः, सोमवल्कः कट्वलः"" ॥ ६ ॥

""तारो रूप्यं, सुतारः पारदः; सुरेन्द्रं सुवर्णं, कुटजमन्ये; गोपा सारिवा; कुरुविन्दो मुस्ता, निशातपाषाण इत्यन्ये, उत्तमलोहितरत्नं कुरुविन्द इत्येके ॥ १३-१५ ॥

""भोगिनः सर्पाः ॥ २८-२६ ॥

अध्यायः ४

""दर्वीकराः फणावन्तः, मण्डलिनः फणावर्जिता विविधमण्डलैश्चित्रिताः, राजिमन्तो रेखायुक्ताः फणावर्जिता ईषद्विषा गमालादयः। ""वैकरञ्जाः सङ्-कीर्णजाताः; पृथग्जातीयसर्पिणो पृथग्जातीयसर्पाभ्यां जाता वैकरञ्जाः"" ॥ ६-१२ ॥

""सुपर्णो गरुडः"" ॥ २०-२१ ॥

अध्यायः ५

"एतेन मन्त्रतन्त्राभ्यां तु विष्प्रतीकारः"" ॥ ८ ॥

"कोविदारः काञ्चनारः। कटभी श्वेतस्यन्दः"" ॥ १७ ॥

""सौवीरकं काञ्जिकम्"" ॥ १८-१६ ॥

""विशल्या काष्टपाटला, रक्ता मञ्जिष्ठा; नरेन्द्रः किरमालकः"" ॥ ६१-६२ ॥

""ध्यामकं कत्तृणं, कुटन्नटः श्योनाकः; सितसिन्धुवारः श्वेतनिर्गुण्डी ॥ ६५-६७ ॥

""मुरङ्गी शोभाञ्जनकः, रक्ता लता मञ्जिष्ठा, सुगन्धिका सर्पगन्धिका; किणिही कटभी, मृगादनी कर्कटिका, इन्द्रवारुणीफलमित्यन्ये, पुरः गुग्गुलुः, पालिन्दी त्रिवृत्, कालवल्लीत्यपरे; क्रमुकं पूगफलं, रुबूकमित्यन्ये पठन्ति स चैरण्डः, सुरस्याः प्रसूनं तुलसीपुष्पं, शिखी मयूरः, कुक्कुट इत्यन्ये, "पृषतः चित्तलः"" ॥ ६८-७२ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""पृथ्विका एला, हिङ्गुपत्रिकेत्यन्ये"" ॥ ७३-७४ ॥

...श्लेष्मातकी बहुवारः इति लोके, कट्फलं काश्मरी, मातुलुङ्गो बीजपूरकः, श्वेता गिरिह्वा श्वेतस्यन्दा, किणिही नीलस्यन्दा, सिता शर्करा"" ॥ ७५ ॥

""सुगन्धा सर्पसुगन्धा नाकुलीति यावत्, नगवृत्तिका शल्लकी, श्वेता श्वेतस्यन्दः... ॥ ७६-७७ ॥

""लवणद्वयं सैन्धवं सौवर्चलं च। मालती जाती, नागपुष्पं नागकेशरं"" ॥ ८२-८३ ॥

...सोमराजी वाकुची, सिन्धुवारः श्वेतपुष्पा निर्गुण्डी, चोरको ग्रन्थिपर्णानुकारी, सर्पगन्धा नाकुली सप्तला यवतिक्ताभेदः, श्यामा श्यामलता, प्रियङ्गुरित्यन्ये, अम्बष्ठा पाठा, अश्मन्तको वृक्षोऽम्लोटकानुसारी, भूमिः कृष्णमृत्तिका, कुरवकः स्निग्धपत्रः सितकुसुमः स्वनामप्रसिद्धः... ॥ ८४-८६ ॥

अध्यायः ६

..तिनिशः स्यन्दनः, पलाशः किंशुकः, पिचुमर्दो निम्बः, पारिभद्रको रक्तसुकुमः कण्टकी फलभद्राख्यः..., ककुभः सुगन्धमूलो विटपविशेषः, सर्जकः स्वनामप्रसिद्धो वृक्षविशेषः, कपीतनो गर्दभाण्डः, श्लेष्मातको बहुवारः। प्रग्रहः किरमालकः, महावृक्षः सेहुण्डः, अरुष्करो भल्लातकः, मधुकं यष्टीमधु, मधुशिग्रुः शाकविपटः, रक्तशोभाञ्जनक इत्यपरे, शाको महापत्रः 'श्रीपर्णं' इति लोके, गोजी गोजिह्वा, इक्षुरकः कोकिलाक्षकः, गोपघोण्टा कर्कोटी, अरिमेदो रामकः""। मूलं पिप्पलीमूलं, वराङ्गं वनवासिकात्वक्, चोचं द्वितीया स्थूला त्वक् यां शाल्मलकमित्याचक्षते, करञ्जिका नक्तमालः; अनन्ता उत्पलसारिवा, सोमः सोमवल्कः कट्फलाख्यः, बाह्लीकं कुङ्कुमं, गुहा शालपर्णी; प्लक्षः पर्कटी, निचुलको जलवेतसः वक्रं तगरं; आलं हरितालं; वर्धमान एरण्डः; पुत्रश्रेणी द्रवन्ती, टुण्टुकः श्योनाकः, एलवालुकः स्वनामप्रसिद्धः; नागदन्ती इन्द्रवारुणीभेदः... ॥ ३-७ ॥

""तिलपर्णिकं 'हुलहुल' इति लोके; गयी तु तैलपर्णिकः सरलरसः नवनीतखोटिरिति प्रसिद्धः; नलदं उशीरभेदः लामज्जकं, भद्रश्रियं श्वेतचन्दनं, यवफला दुग्धिका, नीली नीलाञ्जनिका शारदं फलं, सुगन्धिका सर्पसुगन्धा; कालेयकं पीतचन्दनं, जटा द्वितीया मांसी, पुन्नागः स्वनामप्रसिद्धः, एला स्थूलैला।""ध्यामकं कत्तृणं, तोयं बालकं, हरेणुः रेणुका; क्षुद्रैला सूक्ष्मैला, कुटन्नटः वन्यकः, 'फञ्जीमदनक' इति लोके; 'शिलापुष्पं शिला मनःशिला; पुष्पं पुष्पकासीसं; कालानुसारिवा तगरभेदः काश्मरी श्रीपर्णी, शीतशिवं कर्पूरं, शमीत्यपरे, सोम-

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

राजी बाकुची, पृथ्विका श्यामवर्णः स्थूलजीरकः, हिङ्गुपत्रिकेत्यपरे; श्वेते इति कटभीद्वयं, श्वेतामिति केचित् पठन्ति तत्र श्वेता वचा, स्थौणेयं ग्रन्थिपर्णकं''''', तृणशून्याः केतक्याः, मल्लिकाया इत्यपरे''''; सिन्धुवारो निर्गुण्डीभेदः; अश्वकर्णः सर्जभेदः, तिनिशःस्यन्दनः, बिम्बी कुन्दुरिका; सर्पाक्षी रक्तपुष्पा पूर्वदेशे प्रसिद्धा; गन्धनाकुली सुगन्धमूला रास्ना, शिलापुष्पमित्यत्र तिलपुष्पमिति केचित् पठन्ति तच्च प्रसिद्धं''''अष्टौ लवणानीति जेज्जटाचार्यः, तन्नेच्छति गयी'''' ॥ १४-२७ ॥

अध्यायः ७

''''जालिनी कोशातकी, ऋषभी कपिकच्छुः, बृहत्यश्चेति चकारेण क्षारमित्यत्रापि सम्बन्धनीयम्''''॥ १५ ॥

''''सहे मुद्गपर्णीमाषपर्ण्यौ'''॥ १८-२० ॥

''''भद्रकाष्ठं देवदारु, जटा जटामांसी'''॥ २२ ॥

''''श्वेतां श्वेतस्यनन्दां'''॥ २३-२४ ॥

''''अंशुमती शालपर्णी, गोजी गोजिह्वा, अमृता गुडूची; वक्रं तगरं, सर्पगन्धा सर्पच्छत्रिका । समृत्तिकाः सक्ष्णमृत्तिकाः, 'अहिमृत्तिका' इति केचित् पठन्ति, अत्राहिमृत्तिका वल्मीकमृत्तिकाः 'अववृत्तिका' इति जेज्जटाचार्यः पठति; तत्रागवृत्तिका शल्लकी । ''''काकादनी कृष्णश्रीफलिका'''॥ २५-३१ ॥

'''शुक्राख्यः चर्मकारवटः''''॥ ३४ ॥

''''कट्वी कटुरोहिणी''''॥ ३८-४० ॥

''''श्वा कुक्कुरः '''तरक्षुः मृगशत्रुर्व्याघ्रविशेषः 'जरख' इति लोके, ऋक्षो भल्लूको तिलोमशः 'रीच्छ' इति प्रसिद्धः'''॥ ४३-४५ ॥

अध्यायः ८

'''स्थिरादौ शालपर्ण्यादौ'''॥ ४४-४५ ॥

'''वक्रं तगरं, सुवर्चिका स्वर्जिकाक्षारः'''' ॥ ४६-४७ ॥

''''निचुलो वेतसः, जलं बालकम्''''॥ ४९-५० ॥

''''विश्वम्भराभिः तिसृभिः । अतिबला कङ्कतिका; अतिगुहा शालिपर्णी गुहा पृश्निपर्णी ॥ ५१ ॥

''''सहा मुद्गपर्णी'''॥ ५२ ॥

'''रास्ना गन्धनाकुली । '''तुङ्गं पद्मकेशरं, पुन्नाग इत्यपरे । वञ्चुलो जलवेतसः; जेज्जटस्तु कम्बुकेति पठित्वा किणिहीति व्याख्यानयति'''॥ १००-११५ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

''''अक्षीवपिप्पलमिति अक्षीवाद् महानिम्बाज्जातः पिप्पल अक्षीवपिप्पलः; अन्ये शोभाञ्जनाज्जात इति मन्यन्ते''''॥ १२० ॥

''''कर्णिका मांसकन्दी ''''किण्वं सुराबीजम्। ''''शिखी लाङ्गलकी, वंशो वंशत्वक्। ''''दन्तो गोदन्तो गवा दन्तः ॥ १३६-१३७ ॥

उत्तरतंत्र

अध्यायः ६

''''अरिष्टकं कृष्णफलं 'अरीठा' इति लोके'''॥ १८-१९ ॥

अध्यायः ९

''''पुराणं सर्पिः संवत्सरोषितं घृतम्; अन्ये दशवर्षस्थितं घृतं पुराणं कथयन्ति''''॥ ३-४ ॥

''''ह्रीबेरं बालकम्। वक्रं तगरम्। साम्भ इति चतुर्गुणोदकं; अर्धोदकमिति केचित्'''॥ १३ ॥

''''वृक्षादनी वन्दाकः, वृक्षकलम्बुकेत्यन्ये। '''पत्तूरः सितिवारः, 'सिरिवाली' इति लोके प्रसिद्धा। आर्तगलः कण्टकफलो जलमुक्तदेशजः, 'ककुभ' इत्यन्ये। अग्निकः अजमोदा। ''''वीरतरः शरः वेल्लन्तरो वा''''॥ १८-१९ ॥

अध्यायः १०

'''स्रंसनं विरेकः'''॥ ३ ॥

'''गुन्दा एरकाभेदः, गवेधुकेत्यन्ये, शैवलं दूर्वा; शैलभेदः पाषाणभेदः; चन्दनं रक्तचन्दनं, रात्रिः हरिद्रा, अनन्ता उत्पलसारिवा'''॥ ४-५ ॥

''''पालाशं शोणितं किंशुकरसः; अन्ये पलाशखपुरमाहुः। ''''पालिन्दी श्यामा त्रिवृत्, सारिवामन्ये ॥ ७ ॥

'''क्रिमिघ्ना विडङ्गः, धात्री आमलकं, बीजः पीतसारः 'बीजक' इति यावत्, मुस्तादीनां रसे रसक्रिया कार्याः''''॥ ८ ॥

अध्यायः ११

'''कुटन्नटं तगरं; फणिज्झकः तीक्ष्णगन्धः स्वनाम्नेव प्रसिद्धः, अन्ये निर्गुण्डीमाहुः; पत्तूरः शरबालिकः, भङ्गैः पत्रभङ्गैः; अन्ये भङ्गशब्देन पल्लवानाहुः ''''बर्हिष्ठं बालकम् ॥ ५ ॥

''''त्रीण्यूषणानीति त्रिकटुकमित्यर्थः। बर्हिष्ठं बालकम्। अमरकाष्ठं देवदारु। प्रकीर्यः कण्टकिकरञ्जः। '''आलं हरितालम्''''॥ ६-९ ॥

''''मरिचं शुक्लं शोभाञ्जनबीजम्'''॥ १३ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

....इन्द्रसुरा इन्द्रवारुणी....॥ १४ ॥

....जात्याः कोरकं जातीकलिका ॥ १५ ॥

.. नादेयमिति सैन्धवमित्यर्थः। मरिचं च शुक्लमिति शोभाञ्जनबीजमित्यर्थः अन्ये शुक्लमेव मरिचं कथयन्ति। नेपालजाता मनःशिला ॥ १६ ॥

अध्यायः १२

...कटङ्कटेरी दारुहरिद्रा। कालीयकं दारुहरिद्रानुकारि प्रसिद्धम्....॥ ७ ॥

...श्रीपर्णी काश्मरी। धात्री आमलकी, बिम्बीलोटो भिल्लोटो हिमाद्रिजो वृक्षः....॥ ११-१२ ॥

....पत्रं पत्रकम्। अञ्जनं रसाञ्जनम्....॥ १३-१४ ॥

...अञ्जनं रसाञ्जनं। ....नेपाली मनःशिला। मरिचं प्रसिद्धं, केचित् मरिचशब्देन सितमरिचं शोभाञ्जनफलापरपर्यायं वदन्ति। गैरिकं स्वर्णगैरिकम् ...॥ १५-१६ ॥

...सर्वाणि सुवर्णत्रपुसीसताम्ररजतकृष्णलोहादिजातानि। धातवो मनःशिलागैरिकादयः। लवणानि सैन्धवादीनि पञ्च। रत्नानि वैदूर्यमरकतप्रभृतीनि। दन्ता गवादीनामश्वादीनां च। शृङ्गाणि गवादीनामेव....॥ २४-२६ ॥

....शिला मनःशिला। ....कोलास्थि बदरास्थि, कतकं शशपुरीषानुकार्यम्बुप्रसादनं फलं, मधुकं यष्टीमधु, दन्तो गोदन्तः। अर्णवमलं समुद्रफेनम्। ...मधुकं यष्टीमधु। ...वंशजो वंशकरीरः, वंशाङ्कुर इति यावत्...॥ २८-३५ ॥

....मैरेयं सुरासवयोरेकत्र सन्धानं, ...दध्युत्तरकं दध्नसरः....॥ ३९-४१ ॥

....आरेवतः कृतमालकः; 'ऐरावत' इति केचित् पठन्ति, तत्र ऐरावतो नारङ्गम्....॥ ४२ ॥

...कृष्णबीजं पिप्पलीतण्डुलः। कीटशत्रुः विडङ्गः...॥ ४४ ॥

....लवणोत्तमं सैन्धवम् ॥ ५१ ॥

....तुत्थकं कज्जलतुल्यभागं ताम्रपात्रे घृष्टं सर्पिर्युतमञ्जनमिति....॥ ५३ ॥

अध्यायः १३

...मनोह्वा मनःशिला। आर्द्राञ्जनं रसाञ्जनम्। माक्षीकं सुवर्णमाक्षीकम्। ....हविषा घृतेन ॥ ३-८ ॥

अध्यायः १४

....पुष्पं पुष्पाञ्जनं नेपाली मनःशिला...॥ ३-४ ॥

....रोचना गोरोचना, क्षारो यवक्षारः....॥ ५ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""शिला मनःशिला; एला सूक्ष्मैला, नतं तगरं, सिन्धूत्थं सैन्धवम्""
॥ ६ ॥

""पत्रभङ्गैः पत्रखण्डैः; अन्ये पत्रभङ्गशब्देन पल्लवमाहुः""॥ १० ॥

अध्यायः १५

...मण्डूकीं च समुद्रजामिति समुद्रजा मण्डूकी मुक्तानां शुक्तिः। कुरुविन्दः पद्मरागः, 'निशानोपल' इत्यन्ये, अश्मन्तकं सलोपमं (?) मणिविशेषः। वैदूर्यमिति विदूरगिरिसंभवम् अत्यच्छमानीलं, पुलकं स्फटिकमेव पाकाद्वर्णान्तरमापन्नं; केचित् 'वैदूर्योपलकं' इति पठन्ति, तत्र वैदूर्योपलकं वेरुडिकेति व्याख्यानयन्ति। मेषशृङ्ग इङ्गुदीभेदः; केचित् मेषविषाणरचितभाजनं मन्यन्ते ॥ २५-२८ ॥

अध्यायः १७

""शालः सर्जभेदः; नलिनं ईषद्रक्तं पद्मं, उत्पलं नीलोत्पलं, हरेणुः रेणुका, कृष्णह्वा पिप्पली""॥ ८-६ ॥

नलिनं ईषद्रक्तं पद्मं, उत्पलं नीलोत्पलं, किञ्जल्कः केशरः... । गोशब्दस्य पशुवाचित्वादजादयो गृह्यन्ते; यकृद्रसः कालखण्डरस इति व्याख्यानयन्ति ॥ १०-११ ॥

'...हरेणुः हरेणुका... ॥ २३ ॥

नदीजं सैन्धवं; शिम्बीशब्देनात्र हरितमुद्गाः, चक्षुष्यत्वात्; अन्ये शिम्बीस्थाने शिम्बेति पठन्ति, तत्रापि स एवार्थः; अञ्जनं सौवीराञ्जनम्। गवां छागादीनाम्। चन्दनं रक्तचन्दनम्... ॥ २७ ॥

...क्रव्यभुजो गृध्रादयः, एणः कृष्णासारः"" ॥ ३५ ॥

...स्रोतसि यत् समुत्थितं सिन्धु स्रोतसि वर्णसार्पणसयोः स्रोतसि वा यत् समुत्थितं स्रोतोऽञ्जनं, सौवीराञ्जनमित्यन्ये""। ""मालतीकोरकाः जातीकुसुमानि... ॥ ३६-३७ ॥

...कनकाकरोद्भवं तुत्थकं"" ॥ ३६ ॥

""भिल्लोटको हिमवदासन्नभूमिजः ककुभानुकारिफलो वृक्षविशेषः""। "" अञ्जनं सौवीराञ्जनं, ""जलोद्भवं स्रोतोञ्जनं ""अन्ये जलोद्भवं शङ्खं वदन्ति ॥ ४० ॥

... पलाशः किंशुकः, रोहितो दाडिमपुष्पतुल्यपुष्पः, मधुकः स्वनामप्रसिद्धो वृक्षविशेषः... ॥ ४१ ॥

""किणिही अपामार्गः"" ॥ ४२ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

....मागधी पिप्पली। ....माक्षिकं मधु ॥ ४३ ॥

....मूत्रवर्गे अष्टस्वपि मूत्रेषु। ....शिग्रुः शोभाञ्जनकः.... ॥ ४४-४५ ॥

....शतावरीपायस इति शताबरीमूलश्रृतेन पयसा कृतः शतावरीपायसः आमलकेषुवायस इति आलमकश्रृतपयसा कृतः पायस इत्यर्थः। अन्ये तु शतावरीस्वरससिद्धा यवागूः शतावरीपायसः, आमलकस्वरससिद्धा यवागूश्चामलकपायसः। ....यवौदनो वाट्यसंज्ञकः गृञ्जासंज्ञको वा... ॥ ४६ ॥

....जीवन्ती डोडिका, सुनिषण्णकं चतुष्पत्री, अन्ये शिरवालिकामाहुः, वरवास्तुकं; टङ्कवास्तुकं, चिल्ली क्षेत्रवास्तुकः; मूलकपोतिका बालमूलकं, शाकुनं लावादिकं; ....तर्कारी अरणिका, करीरो गूढपत्रः, शिग्रुः शोभाञ्जनकः; आर्तगलो नीलसहचरः.... ॥ ५०-५१ ॥

....सारिवा उत्पलसारिवा।...सिद्धार्थकः सर्षपः। ...पयस्या अर्कपुष्पी, क्षीरकाकोलीत्यन्ये। पत्रं पत्रकम्। ....वातघ्नानि भद्रदार्वादीनि....॥ ८७-९४ ॥

अध्यायः १८

विद्रुमः प्रवालः सिन्धुजं सैन्धवम् ॥ २४-२५ ॥

....हरेणुः वर्तुलकलायः.... ॥ ५६ ॥

....औदुम्बरं ताम्रभागं, शातकुम्भं सुवर्णभागं, राजतं रूप्यभागं....। ....माक्षिके मधुनि, वसा शुद्धमांसस्नेहः। ...मुक्ता मौक्तिकं, विद्रुमं प्रवालं, कालानुसारिवा तगरमूलं, जेज्जटस्तु द्वितीयसारिवामाह। ....असनो बीजकः; शातकुम्भे सुवर्णमये, शाङ्गे ....मेषश्रृङ्गमये.... ॥ ८५-९३ ॥

...वक्रं तगरं, रत्नानि सप्त पद्मरागमरकतनीलवैदूर्यमुक्ताप्रवालहेमानि। उत्पलस्य नीलोत्पलस्य, ...बृहत्योः कण्टकारीद्वयस्यापि कुसुमानि, तुत्थमुत्तमं मयूरग्रीवाख्यं, केचित् तुत्थं खर्परिकातुत्थं, गृहकोपिका गृहगोधिका, गृहकारिकेत्यन्ये.... ॥ ९४-९७ ॥

अध्यायः २१

...नेपालजा मनःशिला। सिन्धुप्रसूतं सैन्धवम्। ....मधुरसा मूर्वा.... ॥ १४ ॥

...पलाण्डुः लशुनभेदः, मधुकं यष्टीमधु; लवणोत्तमं सैन्धवम्। गुटिकाञ्जनं वर्त्यञ्जनम्। दार्वी हरिद्राद्वयं; विदेहदर्शनात्.... ॥ १५ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अध्यायः २१

""वर्षाभिः श्वेतपुनर्नवा, दधित्थः कपित्थः, उन्मत्तो धत्तूरकः, शिग्रुः शोभाञ्जनकः, विटपशाकमन्ये"" ॥ ६-७ ॥

शिग्रुः मधुशिग्रुः, मुरङ्गी द्वितीय शोभाञ्जनकः, कदुष्ण ईषदुष्णः"" ॥ १७-१८ ॥

"तीक्ष्णा मूर्धविरेका इति अपामार्गबीजादिभिः। तीक्ष्णाः कवलाः पिप्पल्यादिभिः"" ॥ ३२-३३ ॥

""राजवृक्षादिः आरग्वधादिः ॥ ४०-४१ ॥

""कार्पासी वनकार्पासी। शैवलं दूर्वा, हठमित्यन्ये। महावृक्षः सेहुण्डः, प्रसवाः पल्लवाः। कुलीरः कर्कटश्रृङ्गी, मण्डूकी ब्राह्मीभेदः" ॥ ४२-४५ ॥

""समङ्गा अञ्जलिकारिका, 'वराहक्रान्ता' इत्यपरे"" ॥ ४६ ॥

"अम्बष्ठा सांकुरडा, शिला मनःशिला, पर्णी शालपर्णी"" ॥ ४७-४८ ॥

""क्रमिघ्नं विडङ्गसारचूर्ण" ॥ ५२-५३ ॥

अध्यायः २३

""व्योषं त्रिकटुकम्। शिवाटी श्वेतपुनर्नवा, शेफालिकेत्यन्ये। उग्रा वचा, तीक्ष्णगन्धा शोभाञ्जनकः" ॥ ४ ॥

"अग्निकः चित्रकः, अजमोदामन्ये" ॥ १० ॥

अध्यायः २४

""विजया हरीतकी ॥ २१ ॥

""श्रीरिति श्रीवेष्टकः नवनीतधूपः, 'गुग्गुली' इति लोके; सर्जरसो राला पत्तङ्गं रक्तचन्दनं; मधुलिका गुडूची, कर्कटतृणमपरे, गोजी गोजिह्विका, श्रीपर्णी काश्मीरी"" ॥ २६-२८ ॥

""श्यामा त्रिवृत्; तिल्वकः पट्टिकारोध्रः"" ॥ २९ ॥

"त्रिकण्टको गोक्षुरकः। श्वेता श्वेतस्यन्दः। सदाभद्रा काश्मरी।"" सरला त्रिवृत्, किणिही कटभी, दारु देवदारु, निकुम्भा दन्ती ॥ ३०-३३ ॥

"तेजोवती काकमर्दनिका, अग्निकः अजमोदा"" ॥ ३६-३७ ॥

"सिता शर्करा, अनन्ता उत्पलसारिवा, चन्दनं रक्तचन्दनं"" ॥ ३८-४१ ॥

अध्यायः २६

"वञ्जुलो वेतसः, कल्हारं रक्तोत्पलं, चन्दनं रक्तचन्दनं, उत्पलं नीलोत्पलं, शैवलं दूर्वा, अम्भोरुहं पद्मम्" ॥ १३-१४ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

....व्योषं त्रिकटुकं, क्षारो यवक्षारः... ॥ २३ ॥

....कृमिघ्नैः विडङ्गादिभिः... ॥ २८-२६ ॥

...मधुकं यष्टीमधुकं... ॥ ३१-३३ ॥

...सारिवा प्रसिद्धा, उत्पलं नीलोत्पलम्.... ॥ ३५ ॥

...मधुमस्तकाः खजुकाः; संयावः कण्डकघृतैश्चातुर्जातककर्पूरसुगन्धः लप्सिकेति लोके, घृतपूरः 'घेवर' इति प्रसिद्धः... ॥ ३६-३७ ॥

...महासुगन्धा उत्पलसारिवा, ...पालिन्दी कालवल्ली । अम्लं काञ्जिकम् ... ॥ ३६-४० ॥

अध्यायः २८

....द्रुमग्रहणं विटपनिषेधार्थम् । ....वातघ्नद्रुमाः स्वप्रभावेण ग्रहावेशमपि निर्वर्तयन्ति, अचिन्त्यशक्तित्वात् ॥ ३ ॥

...सुरामण्डः सुराया उपर्यच्छो भागः, कैडर्यो महानिम्बः.... ॥ ४ ॥

काकादनी काकजङ्घा ॥ ६ ॥

....सोमवल्ली गुडूची, इन्द्रवल्ली मत्साण्डकः गण्डदूर्वेति लोके, मृगादनी इन्द्रवारुणी ॥ ७ ॥

...भक्ष्याः स्वस्तिकमोदकादयः.... ॥ ८ ॥

अध्यायः २६

....अनन्ता उत्पलसारिवा, कुक्कुटी कुक्कुटीशरीरवत् कुसुमचित्रा वल्ली स्फटिकरचितकुक्कुटाण्डतुल्यकन्दा, मर्कटी कपिकच्छुः.... । ....प्रसन्ना सुरा, ... पयो दुग्धम् ॥ ७ ॥

अध्यायः ३०

...मृगैर्वारुः इन्द्रवारुणी; नागदन्ती दन्तिनी; सहदेवा पीतपुष्पा बला, बृहती स्थूलफला ॥ ६ ॥

...करञ्जेषु नक्तमालेषु । नियतात्मना संयतेन्द्रियेण 'करञ्जेषु' इत्यत्रान्ये 'निकुञ्जेषु' इति पठन्ति, निकुञ्जेषु वनेषु ॥ ७ ॥

...निष्कुटे गृहोपवने, अन्ये निष्कुटं वनगहनमाहुः....॥ ८ ॥

अध्यायः ३१

....अजश्रृङ्गी कर्कटश्रृङ्गी, उत्तमारणीत्यन्ये । सहे मुद्गमाषपर्ण्यौ....॥ ३ ॥

... सर्जरसो रालः, पलङ्कषा गुग्गुलुः, नलदं जटामांसी, गिरिः गिरिकर्णिका; अन्ये गिरिकदम्बो महाकदम्बः स्वनामख्यातः....॥ ४ ॥

....अश्वकर्णो गर्दभाण्डः, ककुभः अर्जुनः....॥ ५ ॥

....सिन्दुको निर्गुण्डी...॥ ६-८ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अध्यायः ३२

""कपोतवङ्का कबडवङ्केति लोके प्रसिद्धा ब्रह्मसुवर्चलापरपर्याया। आस्फोता सारिवा। वयस्था ब्राह्मी; अन्ये गुडूचीमाहुः। गोलोमी दूर्वा"" ॥ ३-४ ॥

""तुगाक्षीरी वंशलोचना ""। गिरिकदम्बको महाकदम्बः। गन्धनाकुली सुगन्धा रास्ना। कुम्भिका जलजा""॥ ५-७ ॥

अध्यायः ३३

"'केशांश्चर्म च कुक्कुटस्य, केशांश्चर्म च मानुषस्येत्येके; केचित् चर्मेति सर्पस्य वदन्ति, तेन चर्म त्वक् कञ्चुलिका सर्पस्य"'॥ ६ ॥

"'कुक्कुटी स्फटिकरचितकुक्कुटाण्डसदृशनन्दा कुक्कुटीशरीरवत् कुसुम-चित्रा वल्ली। मर्कटी कपिकच्छुः; मर्कटमूलीत्यन्ये, शुकशिम्बीत्यपरे। अनन्ता सारिवा। "'सर्वगन्धा एलादिकाः""॥ ७-९ ॥

अध्यायः ३४

""सुवहा गोधापदी। प्रचीबलो मत्स्याक्षकः; काकजङ्घेत्यन्ये। नदीभल्ला-तकं नदीपिप्पलिका गण्डोपलीति पर्याया। सर्वगन्धा एलादिकाः। "'रोहिणी कट्फलः। "'बस्तगन्धा बोथयिका। अहेस्त्वचः सर्पस्य कञ्चुकाः। लम्बा तिक्तालाबूः। काकादानी काकतिन्दुका ॥ ३-६ ॥

अध्यायः ३५

""तर्कारी अरणिका, वांशी वंशलोचना; कुबेराक्षी काष्ठपाटला, पेटि-केत्यन्ये ॥ ३ ॥

""भृङ्गाः पत्रभङ्गाः, तदुपयोगिका वृक्षाः। अजहरिगन्धयोरिति बस्त-गन्धाश्वगन्धयोः अजाश्वगन्धाचतुर्गुणरसेन तैलं वसां च संयोज्य""॥ ४ ॥

""मधूलिका मर्कटहस्ततृणम्। पयसि गोक्षीरे"'॥ ५ ॥

"'चाषः कर्णायसः चीरल्लिः 'चिल्ल' इति लोके, चाषादिजिह्वां धारयेत्। वर्णको रोचनिका कम्पिल्लक इत्यर्थः; कङ्कुष्ठमित्यन्ये। ""अञ्जनं रसाञ्जनं, सौवीराञ्जनमित्यन्ये। पारदं शम्भुरेतः। ""पायसं क्षीरसंसिद्धास्तण्डुलाः, पुरोडाशः अष्टाकपालः पिष्टमयः कपालोपरि पक्वस्तृणाग्निना। मन्त्रेत्यादि"" ॥ ६-८ ॥

अध्यायः ३६

"'सरला शुक्ला त्रिवृत्; अनन्ता उत्पलसारिवा, कुटन्नटं तगरं"" ॥ ३-४ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

""वयःस्था गुडूची, ब्राह्मीत्यन्ये, गोलोमी दूर्वा, जटिला मांसी"॥ ६ ॥

""अक्षता यवाः ॥ ७ ॥

अध्यायः ३८

""राजवृक्षादिः आरग्वधादिः ॥ २५ ॥

अध्यायः ३९

""दारु देवदारु, हैमवती वचा, अम्लं काञ्जिकम् ॥ १३० ॥

""मद्यं पुराणं सम्यक् पक्वं, दीपनीयत्वात् कफघ्नत्वाच्च ॥ १४२ ॥

""अस्माभिर्वृद्धपठितत्वात् सर्वोऽपि लिखितः ॥ १४३-१४४ ॥

"कठिल्लं पुनर्नवाशाकं, पापचैलिकं पाठाशाकं, गोजिह्वां गोजीशाकम् ॥ १५१-१५२ ॥

""कपिञ्जलो गौरतित्तिरिः, एणः कृष्णमृगः, पृषतः चित्रमृगः 'चीतल' इति लोके; शरभः अष्टपादुष्ट्रप्रमाणो महाशृङ्गः, कालपुच्छः स च प्रसिद्धः, कुरङ्गः चतुःशृङ्गः 'मेढुली' इति लोके"॥ १५३ ॥

""सारसो रक्तचञ्चुकः पक्षिविशेषः, क्रौञ्चः 'क्रौञ्चि' इति प्रसिद्धः; शिखी मयूरः, तित्तिरः कृष्णतित्तिरिः"॥ १५४ ॥

""सारिवा उत्पलसारिवा, हरेणुः रेणुका""॥ १६९ ॥

""हरेणुका रेणुका; कुस्तुम्बुरु धान्यकं नलदं उशीरम्""॥ १७१-१७२ ॥

""काश्मर्यं गम्भारीफलम्""॥ १७३-१७४ ॥

""श्रीपर्णीशब्देन गम्भारीफलं, ""मधूको गुडपुष्पः; तस्यापि फलं ग्राह्यम्" ॥ १७५ ॥

""पद्मं कमलम्, उत्पलम् ईषन्नीलम्" ॥ १७८ ॥

"आरग्वधः कृतमालफलं, काश्मर्यं गम्भारीफलम् । स्वादुतिक्तकषायाणामिति स्वादूनि द्राक्षामधुकसारिवादीनि, तिक्तानि दुरालभापर्पटककिराततिक्तकप्रभृतीनि, कषायाणि पद्मोत्पलप्रभृतीनि"" ॥ १७९ ॥

"समङ्गा अञ्जलिकारिका, वराहक्रान्तामपरे" ॥ १८२-१८३ ॥

"सप्तच्छदः सप्तपर्णः, स्फूर्जको वनकुरण्टकाकारः फणिज्जकापरपर्यायः" ॥ १८६ ॥

""नागपुष्पं नागकेशरम्"" ॥ १८७ ॥

""पुरो गुग्गुलुः ॥ १९० ॥

""भूतीकं सुगन्धितृणं 'रोहिषं' इति प्रसिद्धम्" ॥ १९३-१९४ ॥

""विजया हरीतकी" ॥ १९५-१९८ ॥
